No. १४६९८

Title जागदीश्यां अनुमिति पञ्चलता दीधिति प्रकाशः

Author जगदीशः

Extent ५६+१=५८ Age

Subject न्यायशास्त्रं

जागदीशं अनुमितिलक्षणम्

पक्षतादीधितिप्रकाशो

वा

१५६९

ज्ञानसे विलक्षणां

१६२०

॥श्रीगणेशाय नमः॥ अनुमितिलक्षणेति अनुमितिस्वरूपकार्येत्यर्थः। व्याप्तिज्ञानजन्याया अनुमितेः किमन्यत्
कारणमिति जिज्ञासायामेव पक्षतानिरूपणादिति भावः। अत्रानुकूलत्वं जनकतावच्छेदकसाधारणं प्रयोजकत्व
मात्रं तेन व्याप्तेरनुमितिहेतुत्वेपि न क्षतिः यत्तु जनकतावच्छेदकमेवात्रानुकूलत्वं व्याप्तिवत्पक्षताया अपि का
रणव्यापारतया सिद्धहेत्वभावस्य परामर्शस्य जनकतायामवच्छेदकत्वादिति मतं पक्षज्ञानकारणमिति तु प्र
मइत्याद्युत्तरग्रंथसंदर्भविरोधापत्तेः पक्षधर्मतामिति पक्षे धर्मत्वं यस्या इति व्युत्पत्त्या पक्षगामित्यर्थः।
पक्षस्य धर्मो धर्मो विशेषः। पक्षत्वमिति वादेवतादिशब्दवत्तलः स्वार्थिकत्वात् व्याप्नोतीति न च वक्तग्रंथस्व
रसंवलितस्यैव पाठस्य धर्तुमुचितत्वात् व्याप्नोतीत्येवधारणं युक्तमिति वाच्यं अप्रयोजकत्वात् व्याप्तिनिरू

पक्षानेतदसिद्धेरेव मूलपाठमनुसृत्य वातयोपन्यासादिति भावः ननु संदिग्धसाध्यधर्मवत्त्वमिति मूलस्य यदि संदेहवि
षयीभूतसाध्यवत्त्वमर्थः तदा विशिष्टवह्न्यादेर्जलादावनुमितिर्न स्यात् तत्र तादृशसाध्याभावेन पक्षताविरहाद
तः साध्यसंशयस्यैव पक्षतात्वमाह यत्रेत्यादिना यद्धर्मिकयत्संबन्धावच्छिन्नयत्प्रकारकत्वनिश्चयत्वेन यत्संश-
यं प्रतिनिवर्तकत्वं स संदेहस्तत्र पक्षकतद्धर्मिकयानुमितौ हेतुभूता पक्षतेत्यर्थः । तेन वह्निधर्मिकघटादिनि
रूपितालकस्य पर्वतधर्मिकवह्निमनुनिश्चयस्यानिवर्तनीयेपि वह्नौ घटादिसंदेहो न पर्वते पक्षकवह्न्यनुमितौ
पक्षता तत्र वह्निमत्त्वनिश्चयत्वेनाप्रतिबंधकत्वादिति भावः । अत्र पक्षधर्मिकसाध्यवत्तानिश्चयनिवर्तनीयत्व
मात्रं बाधनिश्चयेतिव्याप्तमतः संशयपदं न च बाधनिश्चयस्य पक्षतात्वेपि न क्षतिः विशिष्टबुद्धिसामान्यं प्रति

वद्बाधनिर्णयस्याविरोधित्वादिवेतिवाच्यं संदिग्धाप्रामाण्यकस्यबाधनिश्चयस्यसत्वेसित्यालकत्वादपिपराम
2 र्शादनुमित्यापत्तेस्तादृशबाधनिश्चयस्यविशिष्टबुद्ध्यप्रतिबंधकत्वात्संशयपदं।यद्यपिनिर्वह्निःपर्वतोरूप
वत्वात्रवेत्यादिसंदेहात्मकस्यबाधनिश्चयस्यपर्वतधर्मिकवह्निमत्तानिश्चयनिवर्त्यत्वंसंशयत्वेनास्तीति
वह्निसाध्यकपक्षतानिश्चयस्यलक्षणस्यतत्रातिव्याप्तिः।पक्षेसाध्यसंशयत्वोक्तोचनानुगमवाच्योपित
थापिसंशयत्वमत्रतादृशनिश्चयाप्रतिबंधकत्वंतथाचपक्षधर्मिकसाध्यवत्तानिश्चयप्रतिबंधकता व
छे च्छेदकविषयिताशून्यत्वानत्वंकलितार्थस्तेनगृहीताप्रामाण्यकस्यबाधनिश्चयस्यपक्षधर्मिकसाध्यव
त्ताज्ञाननिवर्तकत्वाभावेपितन्निवर्तकतावच्छेदकविषयितावत्वादेवासुदासः।यद्यपिचैवमपिवह्निव्या २
२

प्यसाधकानुमितौ वह्निमान्नवेति संशयः। पक्षतास्यान्तस्यापि पक्षधर्मिकवह्निव्याप्यवत्वरूपसाध्यनिश्च
यनिवर्त्तित्वात् न चेष्टापत्तिः। पर्वतो वह्निमान्नवेति संशयोत्तरं पर्वतो वह्निमान्नवेति संव्याप्यवानि
त्येवं साध्यनिर्णयेपि वह्निव्याप्यसाधकानुमित्यापत्तेः तथापि प्रकृतपक्षविषयताघटितधर्मावच्छि
न्नं यत् प्रकृतधर्मिकप्रकृतसाध्यवत्तानिश्चयनिवर्त्तित्वं तन्निवेशितमित्यदोषः पर्वतो वह्निवान्नवे
ति संशयस्य वह्निव्याप्यवत्तानिश्चयनिवर्त्तत्वेपि तादृशानिवर्त्यतायाः पर्वतधर्मिकवह्न्यभावप्रका
रत्वेनैवावच्छिन्नतया वह्निव्याप्यवत्वरूपप्रकृतसाध्यविषयितानवच्छिन्नत्वात् न च तथापि वह्निर्भूतांत
दलंव्यर्थं वह्निव्याप्यसधर्मापर्वतो वह्निमान्नवेति संशयस्य तादृशपर्वतत्वावच्छिन्नपक्षकवह्निव्याप्य

3

साध्यकानुमितौ पक्षतात्वमुदासकत्वात् नन्वेवं ह्रदादौ वह्न्यभावस्यानुमाने ह्रदो वह्निमान्न वेति संश
यः । पक्षता न स्यात् तन्निष्ठयोः साध्यवत्तानिश्चयप्रतिबध्यतयोः वह्निमत्ताविषयकत्वेनैवावच्छिद्यत
यासाध्यवत्ताविषयकत्वघटितधर्मानवच्छेद्यत्वादिति वाच्यं दुष्टत्वात् ह्रदो वह्न्यभाववान्न वेत्याकार
संशयस्यैव तत्र पक्षतात्वात् साध्यपक्षभेदेन पक्षतायाना नात्वात् व्याप्यवत्तासाध्यकलक्षणा एव सा
ध्यविषयत्वघटितप्रतिबध्यतायाः प्रवेश्यत्वादिति भावः केचित्तु संशयमात्रवृत्तिपक्षताविषय
तानिरूपितसाध्यनिष्ठविषयताकत्वं अतो वह्निव्याप्यसाधकानुमितौ वह्निमत्त्वसंशयस्य निर्वह्नि
त्वसाधकानुमितौ वा महानसीयवह्निमत्त्वसंशयस्य न पक्षतात्वं तस्य तादृशसाध्यपक्षोभयवैशि

३ ३

ष्यावगाहित्वाभावात् एवं च पक्षधर्मिकसाध्यवत्तानिश्चयस्यापि तादृशत्वात् तद्वारणाय निर्विसंत्तमित्या
हुः। न च साध्यं पक्षावृत्ति न वा साध्यं पक्षनिष्ठाभावप्रतियोगि न वा इत्यादिसंदेहस्यापि लक्षतया तत्राव्या
प्तत्वात् तेषां पक्षसाध्योभयवैशिष्ट्यावगाहित्वाभावात् पर्वतो वह्निव्याप्यवान् इत्येवं साध्यनिश्चयनि
वर्तनीयस्य पर्वतो निर्वह्निर्वह्निव्याप्यस्कपर्वतवान्नवेति समूहालंबनस्य वह्निव्याप्यसाधकानुमि
तौ पक्षतात्वप्रसंगाच्च तस्यापि वह्निव्याप्यात्मकसाध्यपक्षोभयवैशिष्ट्यावगाहित्वात् आधेयतासंबधा
वच्छिन्नसाध्यविषयतायाः प्रवेशे तु पक्षः साध्यवान्नवेत्यादिसंशयस्याप्यनुग्रहापत्तेरिति दिक्। ननु प
क्षधर्मिकसाध्यसंशयत्वं साध्यधर्मिकसाध्यसंशयत्वं साध्यधर्मिकपक्षवृत्तितासंशयत्वादिकं वाल

५ घुलक्षणं कुतः परिष्कृतमत आह नेनेति यादृशसंशयावगाहीत्यस्य फलमाह नवेति मूलस्यास्य साध्य
मित्त्वमित्यस्य परिष्कारे बीजमाह । नचातमइत्यादि संदिग्धसाध्यधर्मत्वमिति मूलस्य संदिग्धं साध्यधर्म
त्वं यस्येति व्युत्पत्त्या पक्षवृत्तित्वं साध्ये संदिग्धत्वमिति यावत् किं वा संदिग्धः साध्यरूपो धर्मो यत्रेति यथा
श्रुतोऽर्थस्तत्र प्रथमे पक्षीभूततमःसमवेतत्वस्य द्वितीये च धर्मीत्मकगगणसाध्यस्याप्रसिद्ध्याऽयमपि
दुष्टमित्याहुः येन तमसः पक्षतया गगणस्य च साध्यतयोक्तेरवः अत्र च मते पक्षे साध्यवत्तासंशयोत्तरं
सिद्ध्यात्मकसंशयोत्पादेऽप्यनुमितिर्भवत्येवेति ध्येयं तद्वैकल्यं पक्षतावैकल्यं नन्वयोग्यतायाः स्वानि
रूपणादिति ग्रंथेऽप्येऽनुमित्यायाऽवसंशयस्यापि योग्यतायाः निरसितुमुचितत्वात्तदनिवसनान्मूल
८

स्यन्यूनत्वमतआह संशयेतिसिद्धिबाधयोर्ज्ञानेनकस्यव्याप्तिज्ञानमनोयोगादेः सर्वत्रैवानुमितेः पूर्वसत्वाद्व्या
चष्टेसाधकेत्यादितथाचसाधकेनबाधकेनजनितंतज्ज्ञानमूलेऽन्वयः। ननुपक्षधर्मिकसाध्याभावनिश्च
यात्मनोबाधस्यकेवलान्वयिन्यप्रसिद्धेरतआह केवलान्वयिनिचेति पर्वतोनवाच्यत्ववानित्याकारकः
पराद्यभावप्रतियोगितासंबंधेनवाच्यत्वाद्यवगाह्यपिबाधः स्वंउराः प्रसिद्ध्यातत्रसंभवतीत्यावेदितुं
सुलभमित्युक्तेनचैवंनानाविधानांबाधबुद्धीनामननुगमात्संभवः प्रातिस्विकरूपेणतासांनिवेशेतुना
प्यभावद्वयमितिमूलासंगतिर्विधाभावकूटस्यानेकत्वादितिवाच्यं पक्षधर्मिकसाध्यवत्ताज्ञानविरोधि
निर्णयत्वेनतासामनुगमादितिभावः पुनरितितदुपन्नपरामर्शोत्तरमित्यर्थः। ननुपुनरनुमित्यार्थं

मनुमितीष्टसाधनताज्ञानस्यपूर्वमपेक्षणेतिनैवशाब्दनपरामर्शनाशात्कुतोऽनुमितिःस्यादतआह ततःप
5 रामर्शात्परमितितत्तोऽनुमित्यपेक्षयःइष्टसाधनताज्ञानपरामर्शयोः पृथक्कल्पनेगौरवादाह स्मरणा
त्मकेत्यादिविशिष्टानुभवंप्रत्येवविशेषणज्ञानस्यहेतुत्वादेतुतयातादृशविशिष्टपरामर्शार्थंविशेषण
ज्ञानबाधाकल्पनेगौरवमपिनास्तीत्यावेदयितुंस्मरणात्मकादिसुक्तेनचोक्तपरामर्शात्परमनुमित्या
दशायामनुमितिप्रसंगःसामग्रीसत्वादितिवाच्यंसिषाधयिषारूपायाःपक्षतायाःआगमत्वादिछाया
मच्छेवप्रतिबंधसंभवाच्चेतिभावः।कल्पनीयमितिनचैतावतापिप्रत्यक्षादिभिन्नेवह्निज्ञानंजायतांव
५ ह्न्यनुमितिर्जायतांइत्यादिरूपाणामनुमित्साव्यक्तीनामनुगतरूपविरहात्कारणत्वासंभवइतिवाच्यं

यद्यदनुमित्यासत्व एव यत्पक्षकयत्साध्यकानुमितिस्तत्तदनुमित्याविरहकूटत्वावच्छिन्नाभाववत्वेनैव तत्
पक्षकसाध्यकानुमितावनुमित्याया हेतुत्वसंभवादिति भावः। मिश्रमतमाशंक्य निरस्यति नचेति वाच्य
मित्यन्वयः। अनुमितिजनकेति तत्पुरुषीयतत्साध्यकानुमितौ तादृशानुमितिजनकेच्छैव पक्षतेत्यर्थः
सुलभेति तथाच घनगर्जितानुमितौ न व्यभिचार इति भावः। तस्याईश्वरेच्छाया तदानीं सिद्धदशायां न
तज्जनकत्वं न तादृशानुमितिजनकत्वं तद्भिन्नतादृशानुमितिजनकत्वं हि। अनपायादिति न च तत्पुरु
षीयतादृशानुमितिं प्रति तत्पुरुषीयतादृशानुमित्यव्यवहितप्राक्क्षणवृत्तित्वविशिष्टेच्छात्वेन हेतु
त्वात्तदानीं स्वरूपायोग्यतैव नास्तीति वाच्यं कार्याव्यवहितपूर्ववर्तित्वादिना हेतुत्वस्यापेसार्वभौमीय

6 निरुक्तावेवं निरस्यत्वादिति भावः। तत्तु पादानंतादृशानुमितिविशिष्टत्वं तदभावादिति तथाचासत्सामपि
सिद्धावनुमितिर्न स्यात् व्रसुतैकांतमित्यनंतरमेवानुमित्यंतरं स्यादिति भावः तत्साम ग्रीति तत्पुरुषीय
तत्पक्षकसाध्यकानुमितिसामग्रीविशिष्टत्वमेव तादृशानुमितिजनकत्वमित्यर्थः। प्रसंगादिति तथाच
परामर्शादिकं हेतुर्न स्यादेव छेदकत्वादिति भावः। उछापत्तौ वाधकमाह शेषेति तादृशानुमितिसामग्री
विशिष्टत्वेनैव हेतुत्वसंभवादिच्छाभोगस्यवैयर्थ्यादित्यर्थः न चात्र सामग्रीपदेनेष्टतवः कारणसत्तोम
एव धर्तव्यस्तथाच सिद्धिकालीनपरामर्शस्यापि तादृशस्तोमनिविष्टत्वात्ततोनुमितेर्वारणमनुमेवेछा
६ भागः प्रवेशनीयइति वाच्यं सिद्धिदशानुमित्सात्रस्यानुमितिकारणस्तोमस्यासत्वादन्यथा तादृशाकार

णस्तोमविशिष्टायामगवदिच्छायास्तदानीमपिसत्त्वादिच्छानिवेशेपितत्रानुमितेरुत्कारतापत्तेर्घनगर्जि
ताद्यनुरोधेनतादृशेच्छायाःसामानाधिकरण्यप्रत्यासत्त्याहेतुत्वासंभवादितिभावः।नन्विच्छाभोगेनदेय
त्वादृशानुमितिसामग्रीविशिष्टत्वेनैवहेतुत्वंवाच्यंतथैवानुमित्सायाःसर्वत्रहेतुसंभवादित्यतआहत
दानीमितिसिषाधयिषायांतत्कारणाभावप्रयुक्तःसामग्रीविरहस्तत्कारणस्येत्यर्थःवक्ष्यत्वापाता
दितितथाचावश्यकत्वात्सैवपक्षतायुक्तेतिभावः।ननुक्रमोत्पन्नानांपरामर्शानुमित्सानांयुगप
दसत्त्वात्सहकृतत्वंतदर्थंव्यर्थमतआहयत्रेतिपक्षस्मरणमितितदनंतरंचानुमितिरित्यर्थः।विशि
ष्टानुभवंप्रत्येवविशेषणज्ञानस्यहेतुत्वात्तदपिज्ञानगौरवेनास्तीत्याशयेनस्मरणपर्यंतानुसरणंअ

7 ऽनुमितिहेतुसाधनत्वस्य ज्ञानानंतरं कल्प्यमतो लाघवादाह अनुमितीत्यादि तादृशस्मरणादिति साध्यत
द्व्याप्यविशिष्टपक्षस्मरणादित्यर्थः। अनुमितितदनंतरं चेत्यग्रेनान्वयः। स्मृत्यात्मकत्वे स
हेतुतान्तविशेषणस्य प्रयोजनमुक्त्वा ऽनुभवात्मकत्वे तदाह पूर्वकालेत्यादिना ज्ञानेच्छयोरयो
गपद्यादनुमितिजनकत्वेऽपि विशेषणस्मरणस्यासंभवस्तु तत्रदा ऽनन्तस्मरणे तु परामर्शद
शायामनुमित्यनाशात्तत्र पक्षतेव नोपपद्यतेऽत उक्तं पूर्वकालोत्पन्नेति अनुमित्या पूर्वकालोत्
पन्नेत्यर्थः। अनुमित्याः पूर्वं पक्षासंनिकर्षे अनुमित्यानवधृ यव ह्यादिसाध्यतद्व्याप्यवत्त्वेनप
र्वतादेः प्रत्यक्षमिवत्स्यादृहिर्थ लौकिकप्रत्यक्षासामग्र्याः सर्वतो बलवत्वादनुमित्यनंतरं संनिकर्षेच

परामर्शदशायां नानुमित्सायाः सत्त्वमत उक्तमनुमित्सासमकालेति इदमुपलक्षणं। यत्रानुमितीच्छा साध्यवत्ता
विषयकस्य साध्यतद्व्याप्यविशिष्टपक्षप्रत्यक्षस्यानंतरमनुमित्सा तत्रापि पक्षतासंपत्त्यर्थं। पक्षतासंपत्तयइ
तिसा चानुमित्सादशायामपि घटाद्यवच्छेदेन तदभावस्यानिसत्त्वात् पक्षताभंगः दशान्तामवच्छिन्नत्वविशे
षणतयैव सामानाधिकरण्यस्य पक्षस्यानुमित्साविरहविशिष्टस्योक्तत्वादिति भावः। ननु सिद्धिगोचरेच्छामा
त्रस्य सिषाधयिषात्वविरहत्वे नउक्तस्थानं ज्ञायतामितीच्छायामपि सिद्धिकालिकपरामर्शादनुमितिः स्याद
त आह सिषाधयिषा चेति तत्साध्येति प्रकृतसाध्यविधेयतानिरूपितप्रकृतपक्षविषयताकत्वप्रकारके
त्यनुत्स्येन वह्निविशिष्टह्रदत्वप्रसिद्धावपि ह्रदो वह्निमानिति साध्यनुमितौ न पक्षताहानिः। न च पाषाणत्वे
न पर्वते तेजस्त्वेन वह्न्यनुमितिर्जायतामितीच्छायामपि सिद्धिदशायां पर्वतो वह्निमानित्यनुमितिस्तदि

४ अयावह्नित्वानवच्छिन्नविधेयतानवगाहित्वादिति भावः। वह्निमान्पर्वतस्तस्य प्रत्यक्षं जायतामितीच्छाकार
णार्थमाह अनुमितिविषयिणीति यत्किंचिदित्यादि द्रव्यत्वगोचरं ज्ञानं जायतामितीच्छायामपि वह्निः सि
द्धात्मकपरामर्शानन्तरमनुमित्यनुत्पादादित्यर्थः। तेन ज्ञानं जायतामितीच्छोत्तरं सिद्ध्युत्पादेव स्वप्रकारतात्वावि
षयसिद्ध्यनुपहितत्वविशेषणादेव तादृश्या वारणं सिद्ध्युत्तरं तु तादृगिच्छासंभवेऽपि ज्ञानमात्रस्येव
ज्ञानत्वप्रकारकेच्छाविरोधित्वादिति प्रत्युक्तं ननु अनुमितिविषयकत्वे अनुमितिव्यक्तीनां प्रवेशे गौरवाद
नुमितित्वप्रकारकेच्छैव प्रवेश्यतामत आह अनुमितित्वेति सिद्धात्मकपरामर्शानन्तरं पर्वते वह्निज्ञानं जा
यतामितीच्छाविरहे तदनुत्पद्यते सिद्धेर्विरोधित्वात् सिद्धात्मकपरामर्शपूर्वकालोत्पन्नायाः तादृगिच्छायाः स्व
नानुमितावुपयोगः। स्वविषयसिद्ध्यनुपहितत्वाभावादतः प्रत्यक्षं जायतामितीरूपमित्युक्तं अनुमित्युत्पादा
८ ८

चेतितयाचव्याप्ति चारेलाघवमात्किंचित्करमिति भावः। ननु यत्र वह्निमत्तया पर्वतस्य प्रत्यक्षं जायतामितीच्छे
वप्रत्यक्षत्वेनानुमितिमवश्यमस्तु तत्र तत्रापि सिद्धौ सत्यामनुमित्सापत्तिः। किंच प्रकृतसाध्यविधेयतानिरू
पितप्रकृतपक्षविधेयताकत्वप्रकारकेच्छायाः प्रयोजनकत्वे वह्निभिन्नविधेयकानुमितिर्जायतां प्रत्यक्षा
दि भिन्नं वह्निविषयकज्ञानं जायतामितीच्छादशायां सिद्धिसत्त्वकपरामर्शादनुमितिर्न स्यात् तथा च तादृशाना
दृशेच्छानामप्युत्तेजकत्वं वाच्यमिति ननु गमउ मत आह यादृशयादृशेति सिद्धिसमानकालीनानामनुमि
तीच्छाकदाचित्स्यादिति सिद्धिसाधारणानामुक्तविधेयतापक्षतायां च विशेषणमर्थः कारणतावच्छेदकगुरुत्वापा
दकः स्यादतः सिद्धौ सत्यामित्युक्तं अत्रैकाकारानुमित्साव्यक्तीनामननुगतैकरूपेणोत्तेजकत्वलाभार्थं या
दृशयादृशेत्युक्तमिति भावः। वस्तुतो यद्यदिच्छाव्यक्तिसत्त्वे इत्येव वक्तव्यमन्यथा यत्र सिद्धिकाले कावह्निमा

१ त्परामर्शसत्त्वानुमितिर्नो यतामितीच्छायामपि वह्न्यनुमानादनुमितिः प्रकारकेच्छाविनाश्युत्तेजकतया यत्र
सिद्धासकोवह्निपरामर्श एव तद्धूमत्वादिसाधकपरामर्शोऽपि पक्षत्वाप्यनुमितिर्नो यतामितीच्छादशायां व
ह्न्यनुमित्यापत्तेः एवं पर्वतमात्रपक्षकानुमित्सिद्धासकवह्निपरामर्शो यत्र वह्न्यनुमितिर्नो यतामितीच्छाया
पर्वतो वह्न्यनुमित्यापत्तेः न चेष्टापत्तिः अनुमित्यापत्तिः अनुभवविरोधात् प्रकारांतरेण स्वविषयकत्वपर्य
वसानसंभवेऽनुमित्यामात्मवगतानुगोचरत्वानानर्जनकत्वात् अस्माकं तु समूहालंबनेन स्थलीयत तदि
च्छाव्यक्तीनामुत्तेजककोटावप्रविष्टत्वान्नदोष इत्युक्तेति ध्येयं। इच्छाभावसमुदायस्येति इदमुपलक्षणं।
सिद्धधर्मिकयद्यज्ञानारोपज्ञानसत्त्वे सिद्धिदशायामनुमितिस्तत्तदज्ञानारोपज्ञानाभावसमुदायस्यापि
६ सिद्धौ विशेषणत्वं बोध्यं अत एव मिश्रैरनुमितिग्रंथे ज्ञानारोपज्ञानास्कंदितायाः सिद्धेः सत्त्वं कल्पव ६

त्वमुक्तीनव्याप्तिरिति यद्यप्येवमेवमपि तत्तद्दिक्काविरहव्यक्तीनां विशिष्यविशेषणाभावे विनिगमकाभावदनंतका
र्यकारणभावः। न चैकैकश्याविरहविशिष्टो यो परेक्षाविरहस्तद्विशिष्टस्सिद्धित्वेन प्रतिबंधकत्वे सामानाधिकर
रण्यात्मकवैशिष्ट्यस्याद्विधाप्रवेशाद्दौवरमतस्तावसीनामिक्काविरहव्यक्तीनामेकत्रद्वयमिति। न्यायेन युग
पदेव सिद्धिविशेषणत्वलाघवादिति वाच्यं। सिद्धौ तावदिक्काविरहवैशिष्ट्ये प्रसिद्धांशे प्रत्येकं तदभावसामाना
धिकरण्यस्य वैशिष्ट्यविषयाप्रवेशात् सिद्धौ तावदभाववैशिष्ट्यस्यैव तत्तद्व्यक्त्यभावे परापराभाववैशिष्ट्य
स्य प्रवेशेऽपि गौरवानवकाशात्तथापि सिद्धौ तावदभावानां युगपद्विशेषणत्वे वैशिष्ट्यरूपसामानाधि
करण्ये दृष्टित्वांशस्य सकृदेव प्रवेशात्ध्यापवं प्रत्येकाभावेऽभावांतरवैशिष्ट्यस्य संबंधत्वे तु वैशिष्ट्यघटक
दृष्टित्वस्य बहुशः प्रवेशो गौरवमतो युगपदेव तावदभावव्यक्तीनां सिद्धिविशेषणत्वमुक्तं। किंच सिद्धौ ता

वदभावस्य युगपद्विशेषणत्वे विशेषणतासंबधावच्छिन्नाधिकरणसमवेतत्वमेवानुगतः। संबधस्तर
त्वेकाभावेऽपराभाववैशिष्ट्यं विशेषणतावच्छिन्नाधिकरणेऽविशेषणतयावृत्तित्वं सिद्धाभावांतरवैशि
ष्ट्यं तु विशेषणतासंबधावच्छिन्नाधिकरणसमवेतत्वमित्यननुगतवैशिष्ट्यासंभवादेवनैकाभावविशिष्ट
सिद्धित्वेन प्रतिबंधकत्वं किंतु तावदभावविशिष्टसिद्धित्वेनैवेति दिक्। स्वतंत्रास्तु तत्तदिच्छाविरहकूटवि
शिष्टसिद्धित्वावच्छिन्नाभावस्याखंडस्यैव तत्र व्याप्तित्वेनैव हेतुत्वं तद्व्याप्तित्वं च तादात्म्येन सैव व्याप्तिरित्यदोष
श्चिंतामणिकृन्मते विशिष्टाभावस्यातिरिक्तत्वात् न च कारणतामात्रस्य धर्मावच्छिन्नत्वे मानाभावादव
च्छेदकं विनैवाखंडतादृशसिद्ध्यभावव्यक्तेरनुमितिहेतुत्वमिति प्रलापो ग्राह्यः। व्यापकत्वगर्भिताः
कारणतायामवच्छेदकस्य नानाव्यक्तिस्थल इवैकव्यक्तिस्थलेऽपि संभवेन वारयितुमशक्यत्वात् पद

धीतररत्प्रायास्तकारणताया अवच्छेदकस्य नानाव्यक्तिककारणेष्वपि सत्त्वप्रसंगादित्याहुस्तच्चिंत्यं केचित्तु
पक्षधर्मिकसाध्यविधेयकानुमितित्वप्रकारकेच्छात्वेनैवानुगतरूपेणोत्तेजकत्वं लाघवादिच्छांतरस्थले तु
तादृशेच्छानुपपत्त्यैवानुमितिस्तत्रैव कारणीभूतस्य विशिष्टाभावस्य संपत्तेरित्याहुः। आलोकपरामर्शादि
ति आलोकमात्रपरामर्शादित्यर्थः। तदानीमिति धूमेनालोके च वह्न्यनुमितिर्जायतामितीच्छादशायां धूमलिं
गकानुमित्यर्थं मात्रपदं तथा च धूमलिंगकानुमित्साविरहविशिष्टे आलोकलिंगकानुमित्सा धूमलिंगका
नुमितौ प्रतिबंधिकेत्यर्थः। अत्र यद्यपि धूमलिंगकानुमितित्वप्रकारकेच्छात्वेऽपि नोत्तेजकत्वे धूमेन उभ
त्वस्यालोके न च वह्नेः पर्वतेऽनुमितिर्जायतामितीच्छायामपि वह्निव्याप्यधूमवत्त्वपरामर्शोत्तु पर्वते
वह्न्यनुमित्सापत्तेः। धूमलिंगकवह्न्यनुमितित्वप्रकारकेच्छात्वेन तथात्वे तु धूमेन महानसादावालोके पर्व

।। तेवह्न्यनुमितिर्जायतामितीच्छायामपि धूममात्रपरामर्शात्पर्वते वह्न्यनुमित्यापत्तेः । नच पर्वतपक्षकधूमलिं
गकवह्न्यनुमितौ तादृशानुमितित्वप्रकारकेच्छाविरहविशिष्टालोकलिंगकेच्छाविनैव प्रतिबंधकत्वं धूमेनालो
केन वानुमितिर्जायतामितीच्छायामपि धूममात्रपरामर्शात् धूमलिंगकानुमित्यभावापत्तेः । तादृशेच्छायाः प
र्वतपक्षकवह्न्यनुमितित्वप्रकारकत्वाभावात् तथापि यत्र द्विच्छाव्यक्तिदशायामालोकलिंगकानुमितिर्व्यक्ति
सत्त्वेऽपि पर्वतधर्मिकधूमलिंगकवह्न्यनुमितिः प्रामाणिकी । न तादृशेच्छाविरहकूटविशिष्टालोकलिंगका
नुमितित्वप्रकारकेच्छात्वादिनैव तादृशधूमलिंगकानुमितिप्रतिबंधकत्वं वाच्यमत एवालोकलिंगका
नुमितीच्छाधूमलिंगकपर्वते वह्न्यनुमितिः स्याज्जायतामितीच्छासत्त्वेऽपि धूममात्रपरामर्शादनुमितिस्तदिच्छा
व्यक्तेरुत्तेजकानंतर्गतत्वात् । न च यत्र धूममात्रपरामर्शोत्तरं धूमालोकोभयलिंगकानुमितिर्व्यक्तिर्जायतामि

तीक्षात तस्तदुभयलिंगकपरामर्शात्तुपस्यानुमितिस्तत्रतदुभयलिंगकपरामर्शान्नुपादेयत्वेपिधूमलिंगकानुमिति
स्यादग्निमानुमित्यनुरोधेनतादृशव्याप्तेरप्युत्तेजकत्वादितिवाच्यं तत्रप्रसमूहालंबनपरामर्शव्याप्तिविशिष्टतादृ
शव्याप्तित्वेनैवोत्तेजककोटौप्रवेशयत्वात् इत्थंचालोकेनमहानसेवह्न्यनुमितिर्जायतामितीच्छासत्त्वेपिधूमपरा
मर्शात्पर्वतेवह्न्यनुमितिरत्रसमूहेवतादृशव्याप्तेरपिस्वस्मिन्नुत्तेजकत्वात् अतएवालोकेनवह्न्यनुमितिर्जायता
मितीच्छातदंधूमालोकयोः समूहालंबनपरामर्शात्पर्वतेवह्न्यनुमितिर्नस्यात् तस्यापिधूमपरामर्शाव्यवहि
तोत्तरत्वेनधूमलिंगकानुमितित्वात्तादृशानुमितिविरोध्यालोकलिंगकानुमित्सायाः सत्वादितिनिरस्तंतादृश
व्याप्तेरप्युत्तेजकत्वात् धूमलिंगकत्वप्रकारकेच्छात्वेनोत्तेजकत्वासंभवस्यानुपदमुक्तत्वात् एवमालोकादिलिंगका
नुमितावपिधूमलिंगकानुमित्सायाः प्रतिबंधकत्वमुक्तक्रमेणस्वयमूहनीयमितिदिक् यदिचतत्रेतिअन्यथा

ध्यकानुमित्सायाः उत्तरान्यलिंगकानुमित्साया अपि सत्वतः प्रतिबंधकत्वे मानाभावादिति भावः। तत्रेति
12 सिसाधयिषासत्काले केलिंगकपरामर्शोत्तरं धूमेनानुमिनुयामितीच्छादशायामनुमितिर्जायत इत्यर्थः। न च
तत्तदनुमित्साव्यक्तीनामुत्तेजककोटौ प्रवेशादेव न तत्रानुमितिरिति वाच्यं यत्र सिसाधयिषासत्काले केप
रामर्शोत्तरं धूमलिंगकानुमित्सा ततः क्रमेण सिसाधयिषात्मकपरामर्शवह्न्यनुमितौ तत्र धूमपरामर्शोत्पत्तिस
रो वह्न्यनुमित्सापत्तिः। पर्वतपक्षकवह्न्यनुमितौ तादृशव्यक्तेरप्युत्तेजकत्वादन्यथैव तत्रैव सिसाधयिषात्मक
धूमपरामर्शान्न वह्न्यनुमितिर्न स्यादिति भावः। यद्यपि वह्निप्रमाणस्वविषयसिद्ध्यनुपहितत्वेन धूमा
दिलिंगकतत्तत्परामर्शेण विशिष्टाया एव तत्तदनुमित्साव्यक्तेरुत्तेजकतायां न कोऽपि दोषः। प्रागुक्त
१२ स्थले परामर्शविशिष्टानुमित्साविशिष्टसहकृतसिद्धिसत्वादेव धूमपरामर्शोत्पत्तिदशायामनु १२

मित्यापत्तेरसंभवात्तथापि मिथ्याद्दिंलमतमेकावच्छेदेन पक्षतापरामर्शोभयजन्यत्वमनुमितेः। संपादयितु
मनुमित्सामेवान्यथा निर्वह्नितद्दिंगकानुमित्सितिवाच्येति परेणान्वयः ननु तल्लिंगकानुमितित्वप्रका
रकेच्छाव्यक्तीनामनुत्तेजकत्वे वह्न्यनुमितिर्जायतामित्यादीच्छादशायां सिद्धान्त कोलोकपरामर्शादालोक
लिंगकानुमितिर्न स्यात्तदिच्छाव्यक्तेरालोकलिंगत्वाप्रकारकत्वादत आह तदन्यमात्रेत्यादि। धूमालो
काभ्यां वह्न्यनुमितिर्जायतामितीच्छादशायामालोकपरामर्शात्तु वह्न्यनुमित्यर्थं तथा च तल्लिंगकानुमि
तित्वाप्रकारकत्वे सति यत्किंचिल्लिंगकानुमितित्वप्रकारकेच्छा तदतिरिक्तानुमित्साया वाच्या उत्पर्थः। ति
नप्रमेयत्वलिंगकानुमितिस्थले तदन्यलिंगकासिद्धावपि न क्षतिः। अत्र तदन्यमात्रलिंगकानुमित्यारिक्त
त्वेन विशेषणं किंतु उत्तेजकीभूतताहशेच्छाव्यक्तीनां परिचायकमात्रमिति मंतव्यं। ननु तल्लिंगकानुमि

स्याविरहविशिष्टसिद्धिसत्वेप्यन्यलिंगकानुमित्सायाऽन्यलिंगकपरामर्शोत्तरं साध्यानुमितेरनुत्पादेन व्य
मिचारानवच्छतापा अनुमितिहेतुत्वमत आह लिंगेति लिंगविशेषनियंत्रितं लिंगविशेषावच्छिन्नकार्यताकं
13 तथा च यद्यदनुमित्साव्याप्तिसत्वे सिद्धिदशायां तल्लिंगकतदुपहितकसाध्यानुमितिर्जायते तत्तादृशव्या
प्तिविरहविशिष्टसिध्यभावसत्वलिंगकतदुपहितकतत्साध्यकानुमितित्वावच्छिन्नं प्रत्येव हेतुरतो न व्यभि
चार इति भावः। अन्यलिंगकानुमित्सायास्तल्लिंगकानुमितेरस्वातंत्र्येन विरोधित्वे पक्षतापालिंगविशे
षणानियंत्रितत्वेपि न क्षतिरित्याह तल्लिंगकानुमिताविति सिद्ध्यभावदशायां अन्यलिंगकानुमित्सा
सत्वेपि तल्लिंगकानुमित्सानुत्पत्तेराह सिद्धिकालीनेति सिद्धिविशिष्टेत्यर्थः। तल्लिंगकानुमित्सासत्वे
ऽन्यलिंगकानुमित्सायास्तल्लिंगकानुमितिप्रतिबंधकत्वादाह तल्लिंगकानुमित्साविरोधिविरहविशिष्ट

१३ १३

तितल्लिंगकानुमितित्वं तल्लिंगपरामर्शाव्यवहितानुमितित्वं तथा चालोककलिंगकानुमित्यादशायां धूमालोक
योः समूहालंबनपरामर्शोत्तरं पर्वतो वह्निमानित्यनुमितिर्न स्यात् तस्या अपि निरुक्तधूमलिंगकत्वेनालोकलिं
गकानुमित्यप्रतिबध्यत्वात् अतो विशेषपदं तेन वस्तुगत्या तल्लिंगकानुमितिगोचरयद्यद्विशिष्टव्यक्तिस
त्वे अन्यलिंगकानुमित्या कालेऽपि तल्लिंगकानुमितिर्जायते तल्लिंगकानुमितिगोचरतत्तद्विशिष्टावि
रहकालविशिष्टान्यलिंगकानुमितित्वेनैव तल्लिंगकानुमितौ प्रतिबंधकत्वमुक्तस्थले चालोकलिं
गकानुमित्या व्यक्तेरपि वस्तुगत्या धूमलिंगकानुमितिगोचरतया तद्विशिष्टव्यक्तेरुक्तेन कोटि
निविष्टत्वान्न दोषः। विशेषपदासत्वेऽपि तल्लिंगकानुमित्याविरहविशिष्टेतरस्या उक्तरूपकार्यत्वाप्र
सः। अत्रापि वैशिष्ट्यमेकसमयावच्छेदेनैकार्थसमवेतत्वं तेन पुरुषान्तरीयतल्लिंगकानुमित्यादशायां

नानुमितिरूपत्वात्॥ न च तल्लिंगकानुमित्यामित्वं तदन्यलिंगकानुमित्सेव प्रतिबंधकास्तु तल्लिंगकानुमि
15 त्यादिविरहवैशिष्ट्यस्य वैशिष्ट्यगौरवादिति वाच्यं यत्र सिद्ध्यात्मकस्यापि द्वानुमितिस्वरूपधूमपरामर्शस्योत्तरं क्र
मेणान्यलिंगकानुमितित्वप्रकारेण धूमलिंगकानुमितित्वप्रकारेणेच्छा द्वितीयतृतीयचतुर्थक्षणे धूमलिंगका
नुमित्यनुत्पादापत्तेः। धूमलिंगकानुमित्यामिच्छाया एवालोकलिंगकानुमितिसामग्र्यासत्त्वादिति भावः। अन्य
लिंगकानुमित्सेव वेति विकारोऽनास्थायां पूर्वकल्पोक्तस्य तल्लिंगकानुमित्सादिविरहविशिष्टसिद्ध्यभावत्वे
न तल्लिंगकानुमितिहेतुत्वस्यापि द्वयेतत्कल्पस्य गुरुत्वात्तत्तत्पक्षसाध्यकानुमितौ सामान्यतः सिषाध
यिषादिविरहविशिष्टसिद्ध्यभावत्वेन कारणतान्तरस्यावश्यकत्वेन कल्पत्वाद्व्याप्यसिद्ध्यात्मकपरामर्शोत्त
रमप्यनुमित्यापत्तादिति ध्येयं ननु साध्यकेनानंसिद्धिर्ननिकानुमितिस्त्वया च परामर्शमात्रादप्यनुमितिर्न

१४

१४

स्यात्तस्यैव तादृशसाधकमानत्वादतो व्याचष्टे साध्यवत्त्वनिश्चय इति साध्यवत्त्वनिश्चये सुलैय यद्यपि साध्यनि
श्चयत्वं यदि सामान्याभावप्रकारकत्वे सति साध्यप्रकारकत्वं न दा पर्वतः कपिवह्निमान्नवेति संदेहदशायां प
र्वतो वह्निमानित्यनुमितिर्न स्यात्तादृशसंदेहस्यापि वह्निसामान्याभावाप्रकारकत्वे सति वह्निप्रकारक
त्वात् न च येन रूपेण साध्यता तन्मात्रावच्छिन्नप्रकारताकत्वं निश्चयत्वघटकमतः कपिलवह्नित्वावच्छि
न्नप्रकारताकसंदेहस्य वह्नित्वमात्रावच्छिन्नप्रकारताकत्वाभावात् न दोष इति वाच्यं पर्वतः कपिलव
ह्निमानिति निश्चयदशायामपि पर्वतो वह्निमानित्यनुमित्यापत्तेः। तादृशनिश्चयस्य वह्नित्वमा
त्रावच्छिन्नप्रकारताकत्वाभावात् न चेष्टापत्तिः। अनुभवविरोधात् अत एव गवाश्रितत्वे साध्ये स
कलगवाश्रितत्वं न हेतुविशिष्टसाध्यवत्तानुमितौ विशिष्टसाध्यवत्ताग्रहस्यापि विरोधितया पदाथ

मिताग्रहदशायां तिद्रुसाधनादिति शङ्किवादेमिश्रैरप्युक्तं यदि च साध्यप्रतियोगिकाभावाप्रकारकत्वे
15 सति साध्यप्रकारकत्वमेव साध्यनिश्चयत्वं तदाऽरुक्तरूपवह्निशून्यः पर्वतो वह्निमानित्येवं निर्णयेऽपि
पर्वतो वह्निमान्नवेतिमनुमित्यापत्तिः ।ऽ तन्निश्चयस्य वह्निप्रतियोगिकाभावप्रकारकत्वेनैवं वि-
रोधात् तथापि वह्नित्वावच्छिन्नविषयकानुमितिं प्रति वह्निसामान्याभावाप्रकारकवह्निप्रकारक-
त्वेनैव कपित्ववह्न्यनुभावाप्रकारककपित्ववह्नित्वावच्छिन्नप्रकारकत्वादिना च प्रत्येकधर्मेणै-
व प्रतिबन्धकत्वाद् भावकूटस्यैव पक्षतात्वं विरोधिसाध्यनिश्चयानामननुगतैकधर्माभावात्तव
क्ततः साध्यतावच्छेदकावच्छिन्नप्रकारतानिरूपिततदन्यप्रकारत्वानिरूपितप्रकारतापक्षतानिष्ठविरो-
धिताकज्ञानत्वमेव साध्यनिश्चयत्वं वाच्यं पर्वतः कपित्ववह्निमान्नवेत्यादिसंशयस्तु पर्वतनिष्ठविरो-
९४

ध्यत्वं वह्नित्वावच्छिन्नप्रकारताभिन्नेन कपिलवह्न्यभाववत्त्वावच्छिन्नप्रकारत्वेन निरूपितमतस्तद्व्युदासः शेष
यविशेष्यतायास्तस्यैव प्रकारताद्वयनिरूपितत्वात् एवं च निर्वह्निर्वह्निमांश्च पर्वत इत्यादिसमुच्चयस्यापि
साध्यनिश्चयत्वसंभवात्तत्रसत्वेपि न वह्न्यनुमितिः समुच्चयस्थले प्रकारताद्वयनिरूपितविशेष्यतात्व
मपि गमकात् भूतलं घटवत् पटवच्चेत्यत्र भूतलस्यापि द्विधाभानवत्तत्रापि पर्वतस्य प्रकारद्वयांशे द्वैविध्येन भा
नादित्यत्र लीलावतीप्रकाशादौ विस्तरः। तत्र पर्वतेतरस्य वह्नेः धर्मिते तिन चैवं वह्निमान वह्निमा
निति एवमप्यनुमितिः स्यात् धर्मितावच्छेदकमनंतर्भाव्य वह्निमत्वनिश्चयस्याविरोधित्वादिति वाच्यं इष्ट
त्वात् वह्निमत्पक्षक वह्निसाध्यकानुमितिश्च धर्मिविशेषेपीति मंतर्भाव्य पक्षतायां हेतुताकल्पने
न तदापत्तेः संभवाच्च अत्र धर्मितमुपलक्षणं एकसंबंधेन पक्षे साध्यवत्वनिश्चयेपि संबंधांतरेण

साध्यानुमितेरुत्पादात्। संबन्धविशेषोप्यनुप्रवेशनीयः। पर्वतत्वस्यावच्छेदकत्वं विषयीकृत्यैकत्र पर्व-
ते साध्यसिद्धावप्यन्यत्र पर्वते सर्वत्रैवानुमित्यनुत्पत्तेः। पर्वतत्वसामानाधिकरण्येनेत्युक्ते अवच्छे-
दकत्वमविषयीकृत्य पर्वतत्वप्रकारेणेति तदर्थः। तादृश्यानुमितिः पर्वतत्वसामानाधिकरण्येन साध्या-
नुमितिश्च धर्मिविशेषोपीति तथा च पर्वतत्वप्रकारेण न तु पर्वतधर्मिकवह्न्याद्यनुमितौ तादृश्येन पर्व-
तः धर्मिकवह्न्यादिनिश्चयत्वप्रकारेणैव प्रतिबंधकत्वं वाच्यमिति भावः। अन्यथेति धर्मान्तरे नुमित्य-
नुत्पादे तु धर्मिविशेषो नाभिनिवेश्य इत्यर्थः। अयं तात्पुरुषीयवह्न्यादिविधेयकानुमितिं प्रति तदीयानु-
मित्साविरहविशिष्टतदीयवह्न्यादिमत्त्वनिश्चयत्वेन समानविशेष्यत्वप्रत्यासत्त्यैव प्रतिबध्यप्रतिबं-
धकत्वं न तु सामानाधिकरण्येन प्रत्यासत्त्या तथा सति पर्वतत्वादिविशिष्टविशेष्यकवह्न्याद्यनुमितौ प-

16

१६

र्वतत्वादिविशेषविशेष्यकवह्न्यादिमत्त्वानिश्चयत्वेनविरोधित्वंधर्मितावच्छेदकविषयायवेतत्वमत्यन्तस्त्वा
यनेकधर्मितभावेनानन्तकार्यकारणभावकल्पनापत्तेः नचैतत्वापिपुरुषभेदानन्तहेतुहेतुमद्भावे
ननुपुरुषस्यापिक्वचित्प्रवृत्ततयातद्भेदेनकार्यकारणभावनानात्वस्यत्वयाप्यंगीकर्तव्यत्वात्तुतथा
चास्वरसासंपत्तेः एवंचयत्रधर्मिविशेषनिवेशइतिचेन्नपाषाणत्वेनपर्वतत्वाद्यनिश्चयेपिपर्वतत्वेनतत्र
वह्न्यनुमित्यनुपपत्तेः समानविशेष्यताप्रत्यासत्त्याप्रतिबंधकत्वासंभवात्नचैकधर्मावच्छिन्नविशेष्यत्व
मेवप्रत्यासत्तिरितिदोषः। पाषाणत्वस्याप्येकधर्मतयातदवच्छिन्नविशेष्यत्वस्याप्यावर्तमानत्वात्तद्
र्म्यवच्छिन्नविशेष्यत्वेनप्रत्यासत्तितायांतुतत्तद्धर्मिघटितसंबंधभेदेनकार्यकारणभावानेसमग्रा
पितनन्तपुरुषत्वस्यावच्छेदकधर्मिविधयाप्रवेशेगौरवंपुनरधिकंवस्तुतःसमानविशेष्यताप्रत्यास

स्याविरोधित्वे यत्र पर्वते वह्न्यभावयोर्द्वयोरेव साध्यवत्त्वनिश्चयात्मकः साध्यव्याप्यवत्तापरामर्शानन्तरं च
पर्वतारोसाध्यनिश्चयस्याप्रामाण्यज्ञानं पर्वतधर्मिकानुमितिजीयज्ञानमितीच्छयानन्तरकालं पर्वत
इव वह्न्यादिपि साध्यानुमितिः स्यात् तदप्रामाण्यज्ञानाभावविशिष्टस्यानुमितिस्ताविरहविशिष्टस्य च साध्य
17 निश्चयस्याविशिष्टतासंबधेन वह्निविरहात्तत्तदप्रामाण्यज्ञानव्यक्तेरनुमितिसाध्यक्तेकौनुतेजनक
त्वे पर्वतेप्यनुमित्यनापत्तेरितिभावः। पक्षतेत्यादि पक्षताघटकेदकीभूत पर्वतादिधर्मिविशेष्यत्वमवि
षयीकृत्य साध्यसिद्धावपीत्यर्थः। तदवच्छेदेनेति पक्षतावच्छेदकीभूत पर्वतादिधर्मविशेष्यत्वं विष
यीकृत्यानुमितेर्दर्शनादित्यर्थः। तदवच्छेदेन साध्यसिद्धेरिति पर्वतत्वावच्छेदेन वह्न्यवगाहिसिद्धे
१७ रित्यर्थः। विरोधित्वमित्यन्वयः। एवं च पर्वतत्वावच्छेदेन वह्न्यवगाहि पर्वतधर्मिकवह्निविधेयकानु

मितो पर्वतत्वावच्छिन्नत्वावगाहि पर्वतधर्मिकवह्निनिश्चयत्वेन रतिबंधकत्वं तत्र च पर्वतविशेष्यकत्वं पर्वत
त्वविशिष्टविशेष्यकत्वमात्रं तेन पर्वतत्वावच्छेदेन वह्निनिश्चये पर्वतो वह्निमानित्याकारिकयोरिव नीलप
र्वतो वह्निमानित्याकारिकाया अपि अनुमितेर्नोत्पत्तिः। पर्वतत्वावच्छेदस्तु न स्वरूपसंबंधो नामाभा
वात् किंतु पर्वतत्वव्यापकसाध्यकत्वमेव तदपि संसर्गमर्यादयैव भासते। पर्वतो वह्निमानित्यनुमि
तौ पर्वतत्वव्यापकवह्निसंयोगत्वेनैव संयोगस्य संबंधविधया भानस्वीकारात् न च पक्षतावच्छेदकत्व
व्यापकत्वमेव तदवच्छेद्यत्वमस्तु साध्यप्रवेशो व्यर्थ इति वाच्यं पर्वतत्वावच्छेदेन तद्रूपत्वानुमितेरप्र
माण्यापत्तेः। समवायस्यैकत्वात् पर्वतत्वव्यापकसंबंधेन पर्वतस्य तद्रूपव्यक्तिमत्वात् न च पर्वतत्वव्या
पकवह्निसंयोगेन वह्निः साधनव्यापकत्वाग्रहात् तादृशसंबंधेन वह्न्यनुमितिरसंभव इति वाच्यं एकवि

शेषबाधसहकारात्व्यापकतानवच्छेदकप्रकारेणैवनिरुक्तसिध्यभावरूपपक्षतासहकाराद्व्यापकताव
च्छेदकसंबधेनापिसाध्यानुमितेःसामान्यपरामर्शादेरसंभवात् नचपर्वतधर्मिकवह्न्यनुमितित्वं प्रत्ये
वपर्वतत्वावच्छिन्नपक्षत्वावगाहिवह्निनिश्चयस्यविरोधित्वात् प्रतिबध्यदिशिपर्वतत्वावच्छिन्नपक्षतानिवेशो
ऽवश्यइतिवाच्यं पर्वतत्वावच्छेदेनसिद्ध्युत्तरंतदवच्छेदेनानुमित्सायापर्वतत्वावच्छेदेनैवतत्सामाना
18 धिकरण्येनाप्यनुमित्यापत्तेः। पक्षपर्वतत्वावच्छिन्नपक्षत्वमवच्छेदकतासंबधेनपर्वतत्वादिकत्वावच्छिन्नं
शेप्रकारतयैवानुमितौभासतेतथाचपर्वतःपर्वतत्वावच्छिन्नवह्निमानित्येवानुमितिरितिप्राचीना
स्तन्नऽयंशिखराद्यवच्छिन्नःपर्वतोवह्निमानित्याद्यनुमितौनुपक्षतावच्छेदकीभूतशिखराद्यवच्छिन्नत्वं स्व
रूपसंबधरूपमेवभासते नतुव्यापकतेनतद्भानमननुभवमवात् एवंचतत्रशिखराद्यवच्छिन्नवह्निसंयोगि

नवह्यनुमितौ गिरित्वावच्छेदेन वह्निसंयोगेनैव वह्नेर्निश्चयो विरोधी न तु संयोगमात्रेणैवमवधेयं सामा
नाधिकरण्यमात्रेणेति पक्षतावच्छेदकरूपेण पक्षे साध्यानुमितित्वमेव तत्सामानाधिकरण्येनानुमिति
त्वं तच्च पक्षतावच्छेदकावच्छेदेनानुमितावप्यस्तीत्यतो मात्रपदं सिद्धिमात्रस्येति अत्र पक्षतावच्छेदकसा-
मानाधिकरण्यमात्रेणानुमितित्वं न तदवच्छेद्यत्वमवगाह्यनुमितित्वं पर्वतत्वावच्छेदेन तत्सामाना
धिकरण्येन च परामर्शद्वयात् पर्वतत्वावच्छेद्यत्वेनावगाहि तदवगाह्यनुमित्योर्युगपदुत्पादप्रसंगात् सा
मग्रीसत्त्वात् किंचिद्रूपेण साध्यतावच्छेदकसंबंधेन तादृशधर्मावच्छिन्नसंसर्गताकपक्षधर्मिकसाध्यानु
मितित्वं निरुक्तपरामर्शद्वयस्थले संयोगनिष्ठद्विविधसंसर्गताकसमूहालंबनस्वीकारात् तथा च सं
योगत्वावच्छिन्नसंसर्गताकपर्वतधर्मिकवह्निविधेयकानुमितिं प्रति संयोगत्वविशिष्टसंसर्गताकपर्व

तद्धर्मिकवह्निनिश्चयत्वेनैकरूपेणास्तिद्विद्वयं प्रतिबंधकं पर्वतत्वावच्छेदेन वह्न्यनुमितौ तु संयोगनिष्ठसंस
र्गताकनसंयोगमात्रावच्छिन्ना किंतु पर्वतत्वावच्छेद्यवह्निसंयोगत्वावच्छिन्नैवेति पर्वतत्वसामानाधिक
19 रण्येन सिद्धिसत्वेऽपि तदनुत्पत्तिः न चैवं संयोगमात्रेण वह्निनिश्चयेऽपि पर्वतीयसंयोगेन वह्न्यनुमि
तिः स्यात् न स्याच्च पर्वतीयत्वविशिष्टसंयोगेन वह्निनिर्णयदशायां संयोगमात्रेण पर्वते वह्न्यनु
मितिरिति वाच्यं इष्टत्वात् एवमनयैव दिशावन्यत्रापि प्रतिबंधकत्वमूह्यमिति संक्षेपः। इत्थं चेति
पक्षतावच्छेदकावच्छेदेन सिद्ध्युत्तरं तत्सामानाधिकरण्यमात्रेणानुमित्सायामपि तदवच्छेदेनानुमि
त्यनुत्पत्तेः। तादृशानुमितौ पक्षतावच्छेदकावच्छेदेनानुमित्सैवोत्तेजिका वाच्या एवं पक्षतावच्छे
दकसामानाधिकरण्यमात्रेण सिद्ध्युत्तरं तदवच्छेदेनानुमित्सायामपि सामानाधिकरण्येनानुमि

१९

स्यनुत्पत्तेः। तादृश्यानुमितौ पक्षतावच्छेदकसामानाधिकरण्यमात्रेणानुमित्सैवोत्तेजिका अनुमितिवि
शेषेणापि नियेत्रितं पक्षत्वे यत्पक्षतानत्पक्षकसाध्यकानुमितिं प्रत्येव सामान्यतः पक्षता हेतुः पक्षताव
च्छेदकावच्छेदेनानुमितौ तु तदवच्छेदविशिष्टसिद्धिकालीनातत्सामानाधिकरण्यमात्रेणानुमितावपि
सामानाधिकरण्येन सिद्धिकालीनातदवच्छेदेनानुमित्साद्यथाविरोधीनाच्यायदि चाससाम
पिसमानाकारसिद्धौ पक्षतावच्छेदकावच्छिन्नत्वाद्यवगाह्यनुमित्सायां तत्सामानाधिकरण्याद्यव
गाह्यनुमितेनोत्पादस्तदा सिद्धिकालीनत्वं प्रतिबंधकतायां न प्रवेश्यमिति भावः। साध्यविशेष्य
केति विनाप्यनुमित्सादिस्वादिः। तां प्रतीति पक्षविशेष्यकानुमितिं प्रतीत्यर्थः समानाकारेति तथा च
संयोगसंबंधावच्छिन्नाधेयत्वसंसर्गेण पर्वतनिष्ठप्रकारतानिरूपितवह्नित्वावच्छिन्नविधेयताका

नुमितिं प्रति तादृशसंबधावच्छिन्नपर्वतनिष्ठप्रकारतानिरूपितवह्नित्वावच्छिन्नविशेष्यकनिश्चयत्व
न विरोधित्वं विधेयत्वं तु न प्रकारतानियतः किंतु पर्वते वह्निमानित्यनुमितौ पर्वते वह्निमनुमिनो
मि न तु वह्नौ पर्वतमित्यनुभवसाक्षिको विषयताविशेषः क्वचिद्विशेष्यतान्तरूपीति नासिद्धिः अ
त एव गुणानां गुणत्वमित्यत्रैव विशेषीभूतस्यापि गुणत्वस्य विधेयत्वमुक्तमुपाध्यायैरिति
भावः। ननु पक्षविशेष्यकसिसुतरं मध्यविशेष्यकानुमितिर्न क्वाप्यनुभवसिद्धिरित्यत आह ता
20 दृशेति पक्षनिष्ठप्रकारतानिरूपितसाध्यविधेयताकानुमितिं प्रतीत्यर्थः। सिद्धिमात्रमिति साध्य
विशेष्यकापक्षविशेष्यकाच सिद्धिर्विरोधिनीत्यर्थः। पर्वतो वह्निमानिति निर्णयोत्तरं वह्नौ पर्वत
व्याप्यवत्तापरामर्शाद्वह्निः पर्वत इत्यनुमितौ तत्र वह्नेर्विधेयत्वं किंतु पर्वतस्यैव तथात्वं यद्यपि

२०

वत्ताज्ञानजन्यत्वमनुमितेस्तद्दशाएवविधेयतास्वविषयतास्वीकारादितिभावः। नन्वेवंप्रसिद्धसाध्य
कपरामर्शात्सर्वत्रैवपक्षसाध्योभयविशेष्यकानुमितिःस्यात्पक्षताद्वयसत्त्वेनोभयधर्मावच्छि
न्नसामग्रीसत्त्वादित्यस्वरसाल्लाघवाच्चसाध्यज्ञानत्वेनैवसाध्यविशेष्यकानुमितौविरोधित्व
मित्याह साध्यप्रसिद्धेरेवेति एवकारेणानुमित्यायाउत्तेजकत्वस्यापिप्रतिक्षेपःसूचितः। सा
ध्यज्ञानमात्रस्यविरोधितायामनुभवमपिप्रमाणमाह एअतएवेतिसाध्यधर्मिकानुमितौतज्ज्ञा
नमात्रस्यविरोधित्वादेवेत्यर्थः। इत्थंचधूमव्यापकवह्न्यभाववमपिह्रदइत्यादिव्यतिरिकपरा
मर्शजन्यायाह्रदोधूमाभाववइत्याद्यनुमितावेवसाध्यविशेष्यकत्वात्तत्रैवसाध्यज्ञानेविरोधीति
मेतद्वयंनचैवंगोत्वाभाववोगोत्वव्यापकसास्नाशून्यइत्याकारपरामर्शात्गोत्वाभावेगोत्वंनेत्येवं

पक्षतानिष्ठप्रकारतानिरूपितसाध्यविधेयताकानुमितिनिस्यात्परामर्शस्यैव साध्यज्ञानत्वेन विरो
धित्वादिति वाच्यं गुरुत्वात् गोत्वाभावेन गोत्ववानित्येवं पक्षतानिष्ठविशेष्यतानिरूपितसाध्यविधे
२। यताकानुमितिरेव तन्नोत्पादात् वस्तुतस्तु प्रसिद्धसाध्यकपरामर्शस्य विशेष्यविधेयया साध्यवि
धेयकानुमितित्वावच्छिन्नं प्रत्येव हेतुमन्यथा गोत्वाभावव्याप्यवत्त्वप्रकारकपरामर्शजन्यायां वि
शेषणविधया गोत्वाभावविधेयकानुमितौ व्यभिचारापत्तेः तथा चोक्तस्थले गोत्वाभाववान् गोत्व
वानित्यपि नानुमितिर्विशेषणविधया गोत्वाभावविधेयकानुमितौ गोत्वव्यापकाभाववत्त्व
परामर्शस्य हेतुत्वात् तथाविधगोत्वाभावानुमितिहेतौ गोत्वाभावव्याप्यवत्त्वव्याप्यवत्त्वप्रकार
कपरामर्शविरहे एककारणाभावे त्वन्यत्र विस्तरः। व्याप्तिस्मरणादिनेति यत्रानुमित्सा ततं त्र

२।

धिस्मरणंनतः सिषाधयिषा सत्त्वे परामर्षस्तत्र समर्थः। तथैवतथा सत्येव विशिष्टाभावस्येति अनुमित्या विरहविशि
ष्टसिद्ध्यभावस्य समर्थः सिद्धमतआह अन्येत्वित्यनुमित्याद्यायामिति सिद्धिदशायामिति बाध्येति सिषाधयि
षाशरीरे नानुमित्याद्यायामिति तान्वाच्येत्यर्थः। स्वोत्पत्तौ सादिस्वपदं तत्तदनुमितिपरं तथा च तत्तदनुमि
त्योत्पत्त्यनंतरत्वविशिष्टतत्तदनुमित्याविषयसिद्धिप्रागभावोयोग्यत्वेत्यर्थः। सिद्धकालीनपदं तु
मितिव्याप्तिदशायामुत्तरकालमनुमितिर्भविता तदनुमित्याव्याप्तिविषयहेतावसिद्धिप्रागभावस्य
वर्तमानसिद्ध्यंतरदशायामपि सत्वात्तदानीमनुमितेर्वारणाय तदंविशिष्टंतंतत्तदनुमित्योत्प
त्त्यनंतरत्वं तु न तत्तदनुमित्योत्पत्तिध्वंसविशिष्टत्वं तथा सत्यनुमित्योत्पत्त्यनंतरदाणेऽनुमित्यनापत्तेः
सिषाधयिषोत्पत्तिक्षणेऽअनुमित्योत्पत्तिध्वंसविशिष्टस्य तद्विषयसिद्धिप्रागभावस्य सत्वात् किंतु

तत्तदनुमित्याप्रागभावविरहविशिष्टत्ववैशिष्ट्यं चैककालावच्छिन्नैककालत्ववृत्तित्वमिति नातिप्रसंगः त
त्तदनुमित्याप्रागभावविशिष्टत्वेनोक्तोक्तानुमित्योत्तरमनुमित्युत्पादेपि पुनरनुमित्यापत्तिः रतस्तत्तदनु
मित्याविषयसिद्धिप्रागभावपर्यंतानुसरणेन च सिद्धिकालीनानुमित्याया स्वविषयीभूतेकानुमित्यु
त्पाददशायामपि दिनांतरभाविस्वविषयीभूतानुमित्यनंतरप्रागभावसत्त्वादुत्तरकालमनुमित्यनं
२२ तरापत्तिरितिवाच्यं तत्तदनुमित्याप्रागभावाविरहविशिष्टस्य तत्तदनुमित्याविषयीभूतसिद्धिप्रागभाव
कूटस्यविवक्षितत्वात्तदुत्तरस्थले चोत्पन्नानुमितेरेवप्रागभावस्यासत्त्वादितिभावः। इत्यादिनेति
अनुमानतः साध्यनिर्णये तु स्वविषयसिद्धावनुत्पाद एव नास्त्यत्वादितिभावः। यद्यपि स्वपदेनानु
मित्युपधायकतत्तदनुमित्याव्यक्तीनामुपग्रहे दिवसांतरीयानुमित्याव्यक्तेर्योग्यतायामप्रवेशा

त्रैघदोषस्तथापि न ह्यनुमितित्वप्रकारेणातीतानुमितिगोचरेष्टायाः सिद्धिकालेवह्न्यनुमितिर्नस्यात्तद्विष
यानुमितिप्रागभावकूटस्य तदानीमसत्वात् तत्तदनुमित्यपूर्वक्षणावृत्तितत्तदनुमित्याविषयसिद्धीनां
विवक्षायां कथंचित्तदुपादानेप्यनुमितिद्वयं जायतामितीष्टायाऽनुमितिद्वयं न स्यात्तदनुमित्याविषयी
भूतानुमितिप्रागभावकूटस्य तदानीमसत्वात् तत्तदनुमित्यपूर्वक्षणवृत्ति प्रथमानुमित्युत्पत्तिदशा
यामसत्वात् कारिष्टायामपि मिश्रैरुत्तेजकत्वोपगमादित्यादि द्रष्टव्यं ऽ उत्तेजितो बाधकं विनाता
तानेव कानइति सिसनुसन्धते र्नन्वेतादृशकालस्योत्तेजकत्वे किं मानमत आह फलेति ननु यत्रानु
मितेतरं परामर्शस्तत्रत्यकालानामनुपादाने यत्र सिद्ध्यालम्बकपरामर्शोत्तरमनुमित्स्यात्तत्रानुमि
तिर्नस्यात्तत्रत्यकालानामनुत्तेजकत्वादत आह अथवेति ऽ उपलक्षितं इति तथा चानुमित्यानाश्य

धिकरणत्वतत्कालानुमित्याश्च उत्पन्नस्य तज्जनकमित्याशयः। तावतैव नेति सिद्धिनाशानन्तरमपि याव
त्कालमध्येनुमितिर्नोत्पद्यते तावत्कालं इत्यर्थः ननु क्रियासमककालानां तावत्त्वसमयानामभा
वस्य सर्वदैवाभानि सत्त्वान्नोक्तयोग्यताविवक्षायामप्यनुमित्यानाशानन्तरमनुमितेः संभव इत्यत आ
ह विशिष्येति तथा च जन्याभावस्य कालोपाधितायां समूर्मवितं तत्र ज्ञानाधिकमेव तादृशसमयो
23 वाच्य इति शेषः अवहितैवेति भावि क्तेन्नावधानैरेवेत्यर्थः सकर्मकस्यावधातोः पचस्यादेरिव
कर्तरि क्तस्यानुत्पन्नस्यादितिध्येयं अनुमित्याव्यक्तीनामिवतत्राशाधिकरणक्षणानां मध्ये तज्जक
विषयापक्षतायां निवेशोगौरवं विनानुमित्यामनुमित्युत्पादस्य संदिग्धत्वादिस्वरसो वद्दती
त्यनेन सूचितः उत्तानाक्रोत्य इत्यादि त्विस्यादि लौकिकप्रत्यक्षान्यथानुपपत्त्या मपेक्षावुद्धी

२३

नामिवानुमित्यानाशान्तरसिद्धिरित्यनुपपन्नं तत्तदनुमित्यनुपपत्त्या ज्ञानानुत्पन्नसिषाधयिषासामग्रीनामे
वत्रिचतुरक्षणावस्थायित्वं कल्पयितुमुचितं विरोधिगुणानां नाश्यनाशकभावस्य विशेषतत्रैवावि
श्रामाद्वितीयक्षणे विनाशस्यामश्यनाश्यकल्पनादित्याहुः। साध्यनिर्णयेति साध्यनिर्णयप्रकारकेच्छा
नेतरमित्यर्थः। पूर्वोक्तन्यायेन अनुमित्याज्ञानानुत्पन्नविशेषणज्ञानादिक्रमेण प्रत्यक्षमितितत्रत
दनंतरमनुमितिप्रसंग इति परेणान्वयः। तथाविधप्रत्यक्षस्य विशिष्टानुभवतया तत्ज्ञानक
विशेषणज्ञानादिकल्पने गौरवादाहस्मरणं त्विति ननु यद्यपि सिसाधयिषासिद्धिदशायामनुमिति
र्जायते तत्रादृष्टाख्यसामग्रीनामिवक्तुं तज्जनकतायामंतर्भावात् साध्यनिश्चयस्य प्रकारकेच्छाया क्वापि
प्रत्तातायामनिवेशान्नातिप्रसंग इत्यत आह यत्रवेति यत्र साध्यवान् साध्यव्याप्यवान् साध्यवा

पाधर्मेव्याप्यत्वांशस्यपक्षः पक्षस्साध्यानुमितिस्तद्व्याप्यवत्त्वानुमितिश्चेष्टसाधनमितिस्मेकंस्मरणमित्यर्थः अ
त्रानुमित्साद्दशायामनुमितेःकारणायसाध्यवत्त्वेनिवेशितंमानसत्वावच्छिन्नंप्रतिविशेषसामग्र्याः
प्रतिबंधकत्वमतेतयानुमितेःकारणसंभवात्साध्यव्याप्यवत्त्वस्यतद्व्याप्यधर्मांतरवत्त्वस्यच
निवेशोनुमित्सांतरंसाध्यतद्व्याप्ययोरेवेत्यनुमित्सयैमन्यथापरामर्शविरहेणोत्तरकालंसाध्या
नुमित्सापत्तसंभवात्दृष्टसाधनत्वंपुनरनुमित्सायाःसामग्रीसंपत्त्यर्थंनिवेशितमितिउद्देश्यत्वंतयोरि
तिसाध्यतद्व्याप्ययोरित्यर्थः आनुमितिप्रसंगःसाध्यानुमितिप्रसंगःतत्त्वादिष्टाव्याप्तिसत्त्वेसिद्धदशा
यामनुमित्सानुत्पादेनतस्याअप्रयोजकत्वादितिभावः तदुक्तिरितियथादिष्टाव्याप्तिस्तत्तेजिकास्वविषय
सिद्ध्यभाववविशिष्टत्वंतद्विशेषणमित्यर्थः यद्यप्येवमपिपक्षेच्छस्पलएवसाध्यानुमितिरूपेष्टसा

धनतागोचरस्मरणात्साध्यानुमितिद्वयप्रकारतानुमित्यात्तत्रैकानुमित्यनंतरं साध्यानुमित्यनंतरं न
स्यात्प्रथमानुमित्यनुत्पादेनैकानुमित्यायाः स्वविषयासिध्युपहितत्वात्तादृशेछायामुक्तविशेष
णाप्रवृत्ते पि पक्षताघ्राव्याप्तिकसिध्युत्तरं वह्न्यनुमितित्वप्रकारकैव वह्निप्रत्यक्षगोचराविषेवादिनीछा
तत्र वह्न्यनुमितिर्नस्यात् अनुमित्यायाः स्वविषयीभूतप्राव्याप्तिकसिध्युपहितत्वेन तदनुपहितत्व
विशिष्टानुमित्याविरहसहकृतायाः सिद्धेः सत्वात् न च येन रूपेण सिद्धिस्तादृशेछाविषयत्वं त
द्रूपावच्छिन्नसिध्यभाववैशिष्ट्यं विवक्षितं तथा च वह्न्यनुमितिस्थानविशिष्टाभाववैशिष्ट्यस्य तादृशेछाव्य
क्तौ सत्वान्नदोष इति वाच्यं यत्र पक्षे यस्य साध्यस्य प्रसक्तं कदाचिदपि न जातं तत्पक्षे तत्साध्यकप्र
त्यक्षायातिरिक्तेछानेजायमानामितीछाया अनुमितिजनकत्वापत्तेः। येन रूपेण तत्रेछाविषयत्वं तादृश

स्यतत्पक्षकतत्साध्यवत्ताज्ञस्यपक्षाभिन्नज्ञानत्वस्याखंडस्याप्रसिद्धेस्तथात्वेनैकीभूतपक्षादिज्ञाय
क्तौयात्तदृशायात्तदृशासिद्धिः प्रतिबंधिकातात्तदृशात्तदृशास्यानुपहितत्वंतत्तादिज्ञाविशेषणंतेनपक्ष
25 पक्षसाध्यकज्ञप्तपक्षमप्रसिद्धं तत्रापितादृशाज्ञप्तपक्षभिन्नज्ञानत्वप्रकारकेच्छायांतत्पक्षतत्सा
ध्यकानुमितिरेवप्रतिबंधिकास्त्वीतितदनुपहितत्वमेवतादिज्ञायांविशेषणमित्यदोषः। ननुपक्ष
पक्षसाध्यकानुमित्युत्कस्यापिनोत्पन्नातत्रसिध्यभावत्वमपेक्षाविरोधसिद्ध्यभावत्वेनहेतु
त्वंगौरवमतआह पक्षसाध्येत्यादिपक्षेतिपदयोःपक्षसाध्यपदयोरित्यर्थः सिध्यभावमात्रमितिगौर
वस्यछायामात्रैणिकत्वमपाकरोतिप्रयोजनेतिइदमुपलक्षणंयत्रपक्षेसाध्यवत्ताज्ञानोत्तरंक
दाप्यनुमितिर्नोत्पन्नातत्रसाध्यवत्ताज्ञानाभावमात्रंकारणंननुनिश्चयत्वमपिननिवेशनी

यं एवं पंचैकविधानुमित्सामेवानुमितिस्तत्रतादृशानुमित्सैव पक्षतातया यत्पक्षतासाध्यकपरामर्ष
कालीनसिद्धिदशायामवश्यमनुमित्सानत्रपक्षतानानानुमितिहेतुरित्यपि द्रष्टव्यं यत्पक्षपक्षसाध्यका
नुमितित्स्थले परामर्षदशायां नियमतः सिद्ध्यभावस्तत्रसिद्ध्यभावोपि न हेतुरिति तन्मत्वं तादृशस्थले
मानाभावानुयोगिनामेव परामर्षदशायामवश्यं सिद्धिसंभवेन तदभावस्य हेतुत्वे तेषामेव सर्वदानु
मितिप्रसंगादिति ध्येयं तेनेति पर्वतपक्षतायामनुमित्सानिवेशस्य निःप्रयोजनकत्वेनेत्यर्थः सिषाध
यिषानाशेपि द्वित्रिक्षणं यंतरे सिद्धिसत्वेनुमितेः संपादकेत्याविर्भावोमतमनुपपन्नस्येति यत्वि
तिसिषाधयिषाविरहविशिष्टो यः स्वतारूषणाद्व्यवहितोत्तरक्षणे तत्पन्नानुमितिकोयो यस्तद्भि
न्नसिद्धिरित्यर्थः। अग्रेनुमित्सानाशकालोत्पन्नसिद्ध्यो लसकपरामर्षादनुमितेरुत्पत्त्यर्थं मित्रा

26

तंसिद्धिविशेषणंसिद्धिमात्रस्यैवग्राह्यत्वा:स्वद्वारेणेतरकिंचिद्वारेणोत्पत्तिकानुमितिकतयातद्भि
न्नायायत्ररमसिद्धेरभावस्येदानींसिद्ध्यात्मकपरामर्शमात्रस्यलसत्वादनुमित्युत्पत्तिरनंतक्षणमव्यव
हितेतिसिषाधयिषाविरहविशिष्टस्वद्वारेणाव्यवहितोत्तरत्वंचसिषाधयिषाविरहविशिष्टस्वद्वारेण
ध्वंसानधिकरणत्वेसतितादृशस्वसमयध्वंसानधिकरणत्वंतत्रस्वसमयध्वंसानधिकरणका
लध्वंसानधिकरणत्वेसतीत्युक्तौयत्रक्रमेणानुमित्सासिद्धिपरामर्शानुमित्सानुमितयस्तत्रसि
द्ध्युत्पत्तिकालपर्यंतस्थायिनमनुमित्सापूर्वोत्पन्नस्थूलकालोपाधिमादायपरामर्शद्वारेपिपद्य
ताविरहप्रसंगः।सिद्ध्यधिकरणतादृशकालोपाधेरनुमित्सापूर्वत्वकाप्यवच्छेदेनसिषाधयिषावि
रहविशिष्टतयानुमित्साविरहविशिष्टस्यनिरुक्तस्वसमयाव्यवहितोत्तरत्वस्यपरामर्शद्वारेणएवपर्य

वसानात्तदानीं वानुमित्यनुत्पत्त्यानसिद्धेरपि निराकाङ्क्षानुमितिकभिन्नतया प्रतिबंधकत्वादतः अथ
मोऽकरणपदं तथा च तत्रास्ति बाधपक्षताविरहविशिष्टः स्वक्षणः परामर्शोत्पत्तिक्षण एवेति तदव्यवहि
तोत्पत्तिकानुमितिकत्वात्तस्यासिद्धिविरोधिनीत्यदोषः । सत्यंतमात्रोक्तौ च सिद्धिमात्रस्यैव प्रायशः
स्वक्षणध्वंसानधिकरणकालध्वंसानधिकरणीभूतस्वपूर्वकालोत्पत्तिकानुमितिकतया तत्रापि न
सिद्धप्रसिद्धिः स्यादतः स्वसमयध्वंसानधिकरणत्वाफलं यत्र क्रमेण केवलसिद्धिपरामर्शौ तत्राप्य
नुमितिप्रसंगः परामर्शपर्यंतस्थायिनः प्रहरादिरूपस्थूलकालोपाधेर्निरुक्तिस्वक्षणाव्यवहितोत्त
रतया सिद्धिपूर्वदंडाद्यवच्छेदेनानुमित्युत्पत्तिमत्तया च सिद्धेः स्वक्षणाव्यवहितोत्तरकालोत्पत्ति
कानुमितिकत्वेनाविरोधित्वादतो द्वितीयं क्षणपदं न च स्थूलकालोपाधेरेव स्ववृत्तियावद्ध्वंसावि

27 शिष्टतादशायां कारणत्वानुक्तदोषतादवस्थ्यं यद्युपाध्यवच्छिन्नस्याव्यवहितकारणत्वं तदवच्छेदेनानुमित्सु
त्वपत्तित्वस्य विवक्षितत्वात् कारणिकं सपराह्णानामतिरिक्तपदार्थस्य कारणत्वमते यथाश्रुतस्यैवस
म्यक्त्वाच्च उत्पत्तिपदानुक्तवि कानुमित्सुत्तरमनुमित्संतरापत्तिः पूर्वानुमितेः स्वकारणाव्यवहितो
त्तरक्षणावृत्तिसामकानुमितिकत्वेन तदन्यासिद्धेरभावादतस्तदुपात्तं न च स्वक्षणाव्यवहितोत्तर
क्षणवृत्तिस्वेतरानुमितिकत्वमेव वाच्यं विषयतानुत्पत्तेः स्वेतरत्वापि तथा गुरुत्वादिति वाच्यं यत्र क्षणा
ध्यानुमितिद्वयं जायतामितीच्छया प्रथमं साध्यतयाप्ययोरपेक्षानुव्यात्मिके वानुमितिस्ततः साध्या
नुमित्संतरं तत्र साध्यस्यानुमित्संतरप्रसंगः । अनुमितित्वस्य समानाधिकरणप्रकारतसाधा
विषयिनी च ग्राहानातः पुरुषांतरानुमित्सादिकमादायातिप्रसंगः स्वकारणाव्यवहितोत्तरक्षणत्व

पतिकाभिन्नस्य ज्ञानस्य तु प्रत्यक्षापत्तिस्मरणादेः परामर्शमात्रस्य लेपि सत्वात्तत्र पक्षतासंपत्तये सिद्धिपदमिति
भावः। अत्र यत्र घनानुमितिमस्य सिषाधयिषाविरहपदस्य व्यावर्त्तिमभिदधान एवश्यमस्य तस्मात्प्रयोज
नेष्टवृत्ति अयेति तृतीयक्षणे तृतीयक्षणस्य व्यावधायक इत्यर्थः। सिद्धीति परामर्शीलकसिद्धीत्यर्थः। सं
पन्नपद इति अन्यथा तत्क्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नसिद्धेः सत्वात्तत्र पक्षतानस्या
दिति भावः। ज्ञायमिकस्त्विति सिषाधयिषाविरह इत्यनुसज्यते स्वक्षणस्येति विशेषणमित्यनुसज्यते
यद्यपि सिषाधयिषाविरहविशिष्टां पक्षस्वं तदधिकरणक्षणाव्यवहितोत्तरे त्वादिक्रमेण स्वस्या
पि विशेषणत्वमनुमित्साविरहस्य संभवति तथापि लाघवात् सिषाधयिषाविरहवैशिष्ट्यप्रवेशे गौर
वात् स्वक्षणस्येत्युक्तं यत्रेत्यादि सिषाधयिषासिद्ध्योः युगपत्काले अनुमितिज्ञानासिद्धिसामान्याभावः

वसंभवसतः क्रमेणोक्तसिद्धेरनुमितेस्सकलत्वेनुमित्सायाः स्वविषयसिद्ध्युत्पादेन चरितार्थत्वेनोत्तर
मनुमितिजनकत्वासंभवमतेतिभावः तत्रपक्षतासंपादनमतः घात्मादिकपदंसंपत्यर्थमिति अन्यथा तत्र सि
द्धेणाव्याप्तिरहितात्तद्द्वारेणानुपपत्तिकानुमितिकमित्सायाः सिषाधयिषाविरहविशिष्टसिद्धेः सत्त्वादनुमि
तिर्नस्यादिद्रष्टव्यं च तत्र सिद्धेः सिषाधयिषाविरहविशिष्टस्वद्वारेणाव्यवहितोत्तरद्वारेणानुपपत्तिकानुमिति
28 कत्वघातकत्वपक्षताप्रभावस्यासत्त्वात्पक्षताहानिः नच सिषाधयिषाविरहविशिष्टस्यापि सिद्धेर्द्वारे
स्वघटकप्रवेशेन सिषाधयिषाविरहत्वावच्छेदकोपेतादवस्थ्यं स्वावच्छेदकशरीरावच्छेदेन स्वद्वारेण सि
षाधयिषाविरहवैशिष्ट्यस्य विवक्षितत्वादितिभावः प्रसंगादितिद्वित्रिक्षणानन्तरितानुमित्स्यास्थले
ऽप्यनुमितिस्वीकारेणेष्टापत्तिसंभवादितिभावः उक्तदोषं निरास्यितुमाशंकते अथेति प्रथममित्यादि

तथाचस्वसमयध्वंसाधिकरणसमयध्वंसाधिकरणसमयध्वंसानधिकरणत्वेसतिस्वसमयध्वंसान
धिकरणत्वमेवाव्यवहितोत्तरत्वंवाच्यंतच्चतृतीयक्षणेनुमित्युत्पादोप्यस्तीतिनपक्षताहानिःस्वक्ष
णोत्पन्नस्वक्षणपदंतुक्षणत्वपर्यंतस्यनिष्फलत्वादितिभावःलाघवादाहस्वक्षणध्वंसेत्यादिकि
तरग्रहराद्युत्पत्तिकानुमितिकसिद्धिदशायांपक्षतावारणायसत्यंतंसिद्धिद्वितीयक्षणस्यापिवि
षयिकादिसंबंधेनसिद्धिध्वंसानधिकरणीभूतातीतक्षणादेर्ध्वंसाधिकरणत्वात्तुकालपदंस्वपूर्व
ग्रहराद्युत्पन्नानुमितिकसिद्धिदशायांतद्वारणायस्वाधिकरणेत्यादिविशेष्यदलंकालपदोपसंदा
नात्कालिकसंबंधेनाधिकरणत्वलाभस्तेनसिद्धिपूर्वग्रहरादेर्विषयतयासिद्ध्यधिकरणीभूत
स्यपक्षादिध्वंसाधिकरणत्वेपिनोक्तदोषःस्वाधिकरणत्वमात्रोक्तौवसिद्धिप्राक्कालवारणसंक-

न चैवमनुमित्यनंतरमनुमितेर्वारणाय स्वाधिकरणकालध्वंसानधिकरणत्वपर्यंतोपन्यासो ऽस्य यानुमि
त्यात्मकसिद्धेः स्वध्वंसानधिकरणत्वे सति स्वाधिकरणीभूतो यः स्वोत्पादक्षणस्तद्वृत्तिकानुमितिकत्वे
३ नतद्भिन्नसिद्ध्यभावस्य सत्वादनुमित्यंतरापत्तेः एवं स्वाधिकरणत्वमात्रस्य विशेष्यत्वे यत्रानुमित्य
२१ नाशकाले उत्पन्नदोषनिवेशोपि न स्यादिति ध्येयं न चैवं प्रागुक्तसिद्धिद्वयस्यापि स्वक्षणसाधारणानिरुक्त
स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकत्वघटितसिद्ध्यभावरूपायाः पक्षतायाः सहकृत
एवं सत्यानुमितिबाधप्रसंगविरहदुपपादनं व्यर्थमत आह न याचेति वारणायेति न चैवमपि सिद्धिमता
क्षणाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकत्वेनुमितिकत्वपि सिसाधयिषाविरहविशिष्टो यः स्वक्षणो
त्पत्तिकाव्यवहितोत्तरक्षणस्तद्वृत्तिकानुमितिकसिद्ध्यंतरमित्यत्र तत्पक्षविरोधित्वादिति भावः स्वक्षणस्यापि

१८ २८

शेषक्षणत्वितद्दोषतादवस्थ्यादाह उत्तरक्षणस्येति अनुमित्युत्तरक्षणपर्य्यंतस्थायिस्थूलकालोपाधेरपि
निरुक्तस्याव्यवहितोत्तरफलत्वादेकानुमित्युत्तरमन्यानुमितेर्वारणार्थं द्वितीयक्षणपदस्यावश्यकत्वा
दुत्तरकालस्येति ...क्तौ द्वितीयत्वेति विशिष्टांतमित्यनुसज्यते स्वपदत्वपद इति अन्यथानुमितिस्थाहत्यस्या
व्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नत्वसिद्धेः सत्त्वात्तृतीयक्षणेनुमितिर्नस्यादिति भावः यद्य
पिस्वध्वंसघटिताव्यवहितत्वकत्वेस्याव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकभिन्नाभावस्यैव सत्त्व
कत्वात्तत्सिद्धिपदं व्यर्थं परामर्शहेतुभूतस्य व्याप्तिस्मरणादेर्निरुक्तस्वाव्यवहितोत्तरक्षणोत्पत्तिका
नुमितिकत्वेपि व्यधातिवंधकत्वात् एवं च सिषाधयिषाविरहकूटोपादानमपि व्यर्थं यत्र क्रमेण सिषा
धयिषानुमितयस्तत्रानुमित्साजनकस्य फलत्वादेरेव स्वाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिक

मित्रस्य सत्वादनुमित्सोत्पत्तिक्षणेऽनुमित्सासंभवात् न च जाते ध्वंसाप्रसिद्ध्यानिरूपकस्याव्यवहितो
त्तरक्षणे मतिकमित्रस्यासत्वादेः सत्वात् परामर्शमात्रादप्यनुमितिर्न स्यादतः सिद्धिपदमिति वाच्यं
एतावतापि तादृशानुमितिकमित्रसविषयिकाभावस्यैव सम्यक्त्वे साध्यवत्त्वनिश्चयात्मिकायाः
सिद्धेः प्रवेशानौचित्यात् तथा दिस्वत्वस्याननुगतत्वात् तादृशानुमितिकमसिद्धीनां तत्तद्व्यक्तित्वेन
भेदानिवेश्यास्तत्र स्वपदेन सिद्धिमात्रस्य एव धर्मत्वान्ननुगमसंतरणितावच्छेदत्वविरोधे गौरवात्तथा
30 चस्वाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकसिद्धिमित्रस्य परामर्शादिमात्रस्य सत्वेऽप्यनुमितिर्न
स्यादतः सिद्धिपदं तच्च कामिकसिद्धिसिसाधयिषानुमितिस्थले प्रथमक्षणोत्पन्नतावारणार्थं प्र
थमविशिष्टां तस्य तत्तरक्षणविशिष्टत्वध्रौव्येहितीयाविशिष्टांतं तत्रैवाहितीयक्षणोत्पन्नतावार

णाधेमिलमस्मकुरुचरणाः यतुल्याव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकसविषयकाभावस्यप्रहता
त्वेपरामर्शादेरनुमितिहेतुत्वानस्यादिसेककारणपरिशेषापत्तिमयाम्सिद्धिपदमितित्यत्वंयत्रसाग
रायस्मरणात्मकपरामर्शादनुमितिस्तत्रपरामर्शोत्पत्तिदशायामिवतदापत्तिप्रसंगेनपरामर्शादे
रनुमितिहेतुत्वेनस्यादिसेककारणंपरिशेषापत्तिमयस्याप[illegible]कत्वात्तत्रत्यपरामर्शपूर्ववर्त्तिनां
निखिलविषयकानांस्वाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिकत्वेनाविरोधादिति किंचित्तुअय
त्वानुव्यात्मकपरामर्शेणचतुर्थक्षणेनुमित्सयेसिद्धिपदमन्ययातादृशपरामर्शस्यैवनिरुक्तानुमि
तिकमित्वसविषयकत्वेनप्रतिबंधकापत्तिरित्याहुः ननुयत्र क्रमेणसिद्धिसिषाधयिषानुमितय
स्तत्रप्रथमक्षणेपक्षतासत्वेपीच्छासामग्र्याप्रतिबंधादेवानुमित्युत्पत्तिसंभवात्प्रथमंविशिष्टात

त्वेऽप्यर्थेमत एव द्वितीयमपि तत्त्वयेत्यत आह यदि पुनरिति सर्वदेशे जनकीभूतज्ञानस्य विशेष्यतादशा
यां साध्यज्ञानकारणप्रसंगेन मानसत्वावच्छिन्नेप्रसक्तसामान्येकाप्रतीशसामग्र्याः प्रतिबंधकत्वेप्यनु
मितिं प्रति तस्यास्तथात्वे मानाभावः नचैवं सामग्रीदशायां स्मृतिशाब्दबोधापत्तुदशायां लाघवेन
जन्यज्ञानत्वावच्छिन्नं प्रत्येव तस्याः प्रतिबंधकत्वे मतत्वान्नसत्वेनुमितिसंभवइति वाच्यं सामग्री
७। ष्टसामग्र्यां स्पर्शेयं परिपर्शनु यां शाब्दयामित्यादीशदशायां जन्यज्ञानोत्पादेन चाक्षुषत्वस्याशै
नत्वशाब्दत्वादिप्रकारकेच्छाविरहविशिष्टसामग्रीत्वेन चाक्षुषत्वस्याशैनत्वशाब्दत्वादेरपि कथ
मीवच्छिन्नेप्यसेव प्रतिबंधकतायामनुमितिमंतर्भाव्य इष्टसामग्रीणां प्रतिबंधकत्वाकल्पनात् अन
मा ज्ञानत्वावच्छिन्नेप्रति तत्तदिच्छाविरहकूटविशिष्टसामग्रीत्वेन विरोधितायामिष्टसामग्रीस

त्वेपक्षेयमितीष्टातश्चानुपस्येवस्पार्शनस्यपक्षशाब्दबोधादेरीप्रसंगात्तुजन्यत्वानत्वस्याविशिष्टत्वात्तथा
चानुमित्याविशिष्टसामग्र्याइवेसाध्याभावानुमितिसामग्र्याविरोधित्वं सुवचमित्याशयेनयदिचेत्युक्तं पच
पिस्ताव्यवहितोत्तरक्षणेनुमतिकानुमितिकसिद्धिभिन्नसिद्ध्यभावएवप्रक्रांतत्वात्तदुपादानुमुचितो
गौरवस्यवक्ष्यमाणत्वात्तदपेक्षयाविशिष्टत्वात्तथापिकार्यत्वादस्येवकार्याव्यवहितपूर्वत्वस्यापि
कारणतावच्छेदकेनिरसितुंतदंतर्भावेनपक्षतांनिर्वक्ति अनुमित्यव्यवहितेतिप्रकृतपक्षसाध्यक
त्वसमानाधिकरणतदनुमित्यव्यवहितपूर्ववर्तिसिद्धिभिन्नसिद्ध्यभावः प्रकृतपक्षसाध्यकानु
मितौपक्षतेत्यर्थः प्रकृतपक्षसाध्यकानुमितौप्रागभावाधिकरणसमयप्रागभावानधिकरणत्व
घटितस्यसामान्यतस्तादृशानुमित्यव्यवहितपूर्वत्वस्याप्रसिद्धत्वात्तदिति न च प्रकृतपक्षसाध्यक

नुमित्युत्पत्तिकालीनयत्किंचित्प्रतियोगिकानवृत्तित्वस्य तत्संबन्धावच्छिन्नतत्कालादनुमित्यव्यवहितपूर्व
त्वं सुवचमिति काच्यं तथाप्युत्पन्नसंसर्गितत्त्वे स्वत्वघटितत्वेन विशेषकोविकामानुदयेचवक्तव्यतस्मा
द्व्यकत्वसमानाधिकरणतत्तदनुमित्यव्यवहितपूर्ववर्तित्वस्याप्यननुगतस्याभावान्नुतादृशपूर्वव
32 र्तित्वेनानुगमस्त्वं तन्भेदकूटस्यैवानिवेशनतया तत्र सिद्धिभिन्नस्य मनःसंयोगादेः प्रतियोगिविषया
प्रवेशे गौरवं स्यादतः प्रथमे सिद्धिपदं द्वितीयं तु सिद्धिपदं तादृशसिद्धिभिन्नस्य परामर्शमात्रस्य
सत्त्वेप्यनुमितेरुत्पत्त्यर्थमन्यथा तस्यैव प्रतिबन्धकापत्तेरिति भावः। प्रथमकल्पे <u>दूषयति</u> तादृशे
त्यादि तत्तद्व्यक्तित्वेनेत्यस्य सिषाधयिषाविरहविशिष्टत्वादि सिषाधयिषाविरहविशिष्टत्वेनत
सिद्धित्वावच्छिन्नाभावकूटपर्यः यथाक्रमेण यत्क्रमेण सिद्धिसिषाधयिषानुमितयस्तत्र सिषाधयिष

विरहविशिष्टोयः स्वसत्वाव्यवहितोत्तरक्षणस्तत्तदुपहितकानुमितिकभिन्नसिद्धिः सिषाधयिषाद्वयाश्रयं
सत्वादनुमितिसत्वापत्तिरितिध्येयं स्वसकलसिद्धाविसयपिमध्येयपिसंगच्छतइतिध्येयं निरुक्तरूपेतिसिषाध
यिषाविरहविशिष्टस्य स्वक्षणाव्यवहितोत्तरक्षणोनुपहितकानुमितिकानुमितिकभिन्नसिषाधयि
षाविरहविशिष्टसिद्धित्वेनेत्यर्थः।अनंतेति अवच्छेदकभेदेनैव कारणत्वस्य नानात्वान्न च त
त्तत्सिद्धिकूटस्यत्वेनैकरूपेणैव हेतुत्वं अपेक्षाबुद्धिविशेषविषयत्वरूपस्य कूटत्वस्यापेक्षा
बुद्धिव्यक्तीनां भेदेन नानात्वसंभवादिति भावः ननु धर्माधर्मिकत्वादानंत्यं न दोषायेत्यत आह
नाद्येति परामर्शदशायां यस्यां सिद्धौ नानुमितित्ववैशिष्ट्यं तत्तत्सिद्धिव्यक्त्यावनुमितित्वाविरहविशिष्ट
त्वस्याप्रयोजकत्वादित्यर्थः परामर्शसमानकालीनसिद्धिव्यक्तीनामभावस्य हेतुत्वे मानाभावोपि

33

दूषकं ननु सर्वस्यां सिद्धौ न द्वयमेव तद्विशेषणमित्यत आह तत्तत्समयेति सिद्ध्यधिकरणतत्तत्क्षणे
नसमं संबंधव्यक्तीनामित्यर्थः ननु तत्तत्समयसंबंधस्य विरोधित्वे सिद्धिमतइव पुमंतरस्याप्यनु
मितिर्नस्यात्तादृशसमयसंबंधस्याविशिष्टत्वादत आह तत्तत्समयावच्छिन्नेति सिद्धिकालीनतत्
तन्मनोयोगव्यक्तीनां स्परतया सिद्धिविगमेप्यनुमितिर्नस्यादतोऽवच्छिन्नांतं सिद्धिमतइव जनां
तरस्यापि तत्तत्समयावच्छिन्नमनोयोगसत्वात्तस्याप्यनुमितिर्नस्यादतस्तत्तदिति मनोयोगस्य
विशेषणं मनोविशेषणत्वे तत्तत्समयावच्छिन्नत्वम्मनः प्रतियोगिकसंयोगस्यापि पुमंतरसं
त्वात्तु सिद्धिमतइव तस्याप्यनुमित्यनापत्तेरिति न च तत्तत्सिद्धित्वेन प्रतिबंधकत्वमपि स्यात्
ननु समयावच्छिन्नस्यानुपादेयत्वान्नयोमयत्रापि दूषणसमाधानयोः साम्यादिति भावः कश्चा

च्छिन्नेति सिद्धेरनंतरमनुमितिरित्यनुरुध्यते न नियामकाभावादिति नियमकालाभावादित्यर्थः विवक्षिता
नावच्छिन्नअनुमितित्वस्यानुत्पादस्यैवानुमितित्वस्यानुत्पादकप्रयोजकत्वे पर्यवसानात् दोषत्वपादिति भावः।
ननु पक्षत्वपक्षत्वसिसृक्षुत्वं नानुमितित्वतत्तत्सिद्धिव्यक्तित्वमेवानुमित्युत्पत्तिनियामकं गच्छमतआह न
वेति कारणसमाजाधीनं तत्तत्कार्यावच्छिन्नकार्यत्वं तुपादादिकं तत्तत्कार्यावच्छिन्नकार्यस्य कारणताव
च्छेदककोटौ न विशते गुरुधर्मत्वेन तादृशरूपेणापि जनकतायामनवस्थासिद्धत्वादित्यर्थः तेन तत्तत्कार्यो
त्पत्त्यादिविशिष्टवह्नितोत्पत्त्यादित्वेन हेतुतायां कार्यत्वं तु पादस्यावच्छेदकत्वेपि तत्तन्नोत्पत्ति
विशिष्टवह्न्युत्पत्तित्वेनाप्रवेशाददोषः कार्यत्वं तु पादादिकमित्यादिपदेन कार्यत्वमानवहितपूर्वक्षण
वृत्तित्वादेः स्वक्षणोत्पत्तिक्षणवृत्तित्वादेरुपलक्षकार्यकालवृत्तित्वानुत्पत्यसंग्रहः कार्यत्वं तु पादादिघटितधर्माणां हे

तुल्यप्रतिबंदिमाह तथासतीति स्वक्षणेत्यादि स्वक्षणाव्यवहितोत्तरक्षणोत्पत्तिका स्वसमानाधिकरणा
चानुमितिर्यस्य तादृशानुमितिविषयकत्वेनेत्यर्थः कारणत्वं स्यादित्यन्वयः स्वक्षणाव्यवहितोत्तरक्ष
णस्यानुमितिकस्य परामर्शस्यैव सत्वादनुमित्युत्तरमनुमितिकारणायोत्पत्तिकालावच्छिन्नेति त
दर्थः उत्पत्यवच्छिन्नस्य घटादिज्ञानस्योत्तरमप्यनुमितिः स्यादतः स्वक्षणाव्यवहितोत्तरक्षणोत्
पत्तिकेति स्वक्षणोत्पत्तक्षणः समयमात्रं ननु क्षणत्वं निवेश्यं वैयर्थ्यात् अनुमितेरपि समया
31 व्यवहितोत्तरीभूतस्वक्षणस्थितिपर्यन्तस्थायित्वविरहात् उत्पत्तिकानुमितिकत्वमात्रतोप्यनुमि
त्स्येतरोत्पत्तिरतो द्वितीयं क्षणपदं अनुमितेरपि स्वक्षणाव्यवहितोत्तरक्षणवृत्तिकत्वात्तदुत्तर
मनुमित्यंतरस्य वारणायोत्पत्तिपदं न चैव स्वक्षणाव्यवहितोत्तरक्षणवृत्तित्वेनानुमितिकत्व

३४

मेवतदनुमुत्पन्नामितिवाच्यं यत्र साध्यस्यानुमितिरूपं जायतामितीव्याप्यसाध्यत्ववाप्यत्वयोरपि तदनु
त्पत्तिकानुमित्युत्पन्नं साध्यमात्रस्याप्यनुमितिस्तत्र साध्यस्यानुमित्यंतरत्वसंगानुपूर्वानुमितेस्वत्वस्य
स्याप्रसिद्धत्वात् अजनोत्पत्तिःस्याधिकरणसमभूस्यानधिकरणत्वमात्रं न तु स्वाधारत्वमपि तद्विशेषं
वैयर्थ्यादिति ध्येयं स्वतन्त्र्यावहितोत्तरक्षणोत्पत्तिकानुमित्यंतरानुमितिकाले घटादिज्ञानादनु
मितिकारणाय स्वसमानाधिकरणेति एकत्रानुमितावरशानुमितिकस्याद्वितीयस्यानुमित्यंतरेपि सत्वात्
दनुमितिकारणाय स्वविषयकेति मित्रात्मक परामर्शानुमित्यानुमितीनां क्रमिकत्वस्थलेऽतारस्वा
नासंभवात् ज्ञानात्वापि तदयानुबोधिसविषयकत्वेनिविशेषितं न चैतस्य स्वत्वरूपघटितत्वात् तेन
घटहेतुतावच्छेदकमितिवाच्यं स्वतन्त्र्यावहितोत्तरक्षणोत्पत्तिकानुमितिसमानाधिकरण

त्वेतानपयोदिति भावः कार्यत्वादस्य कारणतावच्छेदकत्वे प्रतिबंदिमुखेन कार्याव्यवहितपूर्वत्वस्य
तथात्वे प्रतिबंदिमाह स्वसमानेत्यादि अत्र तादृशानुमित्यव्यवहितपूर्वत्वं न तादृशानुमितिप्राग
भावादिकरणक्षणभवप्रागभावानधिकरणत्वघटितं अप्रसिद्धत्वात् किंतु तादृशानुमित्युत्पत्ति
35 क्षणोत्पत्तिकध्वंसप्रतियोगित्वं तथा चासिद्धिमात्रादप्यनुमित्युत्पत्तिस्तस्यापि स्वसमाना
धिकरणानुमित्युत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगिप्रहरादिकालोत्पन्नत्वादतः क्षण
पदं यत्र परामर्शेण स्वनाशक्षणेऽनुमितिर्जन्यते तत्र द्वितीयक्षणेऽप्यनुमित्यापत्तिः परामर्श
स्यैव स्वसमानाधिकरणानुमित्यव्यवहितप्राक्क्षणवृत्तेरनुत्पत्त्यवच्छिन्नस्य सत्वादतत्क्ष
मुत्पन्नेति न च स्वस्वस्याननुगतत्वादुक्तरूपेण हेतुत्वमसंभवीति वाच्यं यत्वतत्वादेरिव

स्वत्वस्याप्यनुगतत्वमंगीकृत्यैव दूषणोपक्रमादन्यथा तत्तद्व्यक्तित्वेन स्वपदार्थस्य प्रवेशे कार्यतान
पादादेर्गुरुत्वादिवत्कारणतायामप्रवेशसंभवेऽनन्यथासिद्धिनुरूपान्तरीणावच्छेदकत्वसंबंधेनस्या
न्नतुप्रत्यभिज्ञापत्तेरिति भावः। आदिपदेन ब्रह्मस्वत्वदानाव्यवहितोत्तरक्षणानुत्पन्नकार्य
कान्यत्वस्य कारणतावच्छेदकेऽनुप्रवेशे बाधकमाह स्वत्वदानेत्यादि स्वत्वदानाव्यवहितोत्तरक्ष
णाद्युत्पत्तिकास्वत्वसमानाधिकरणानुमितिर्विषयांतरान्यस्तविषयकत्वेनेत्यर्थः अत्राप्युत्पत्ते
वच्छिन्नत्वं विशेषणमनुसंधनीयमिति नातिप्रसंगः केचित्तु प्रागुक्तस्य स्वत्वघटितत्वेनाननुग
तत्वमाशंक्य स्वत्वदानेत्यादिनैव कानुमितिसुत्तरमर्थमित्यन्तरस्य कारणत्वमस्यापि स्वोत्प
त्तिकालावच्छि   न्नत्वेनाविशेषणीयत्वादननुगमतादवस्थ्यं स्वोत्पत्तिकालावच्छिन्नत्वेन

स्यानुत्पत्तिस्तत्र एव विषयत्वाभावकूटवत्त्वस्याविवक्षितत्वादित्याहुस्तच्चिंत्यं अनुगतस्वत्वमंगी
कृत्यैव दोषोपक्रमादन्यथाकार्यनुत्पत्त्यापत्त्यनुपलक्षितोपास्तत्तद्व्यक्तेरेव कारणतावच्छेदकत्वेका
र्यत्वानादरे स्ववर्गवृत्त्यवच्छेदकत्वस्वत्वं तु न स्यात् संमतत्वापत्तेः प्रत्यक्षाद्यवृत्तिमानस्यापि स्वत्वगर्भत्वेन
संदर्भविरोधापत्तेश्चेति दिक्। ननु स्वविषयकज्ञानस्यैव ज्ञायतेऽतः स्वद्वारा अव्यवहितोत्तरद्वि
३८ गानुत्पत्तिकस्वसमानाधिकरणयत्किंचिदनुमितिव्यक्तिकतया तदन्यस्याविषयकस्य
संसर्गिणापरामर्शमात्रादप्यनुमितिर्न स्यादिति तादृशानुमित्युत्पत्तिकस्वसमा
नाधिकरणानुमितिसामान्यकभिन्नस्याविषयकत्वेन कारणत्वे तु महागौरवमत आह किं
वेति। यन्नुक्तरूपेण हेतुतायामनुमितिसामान्योपधायकत्वं परामर्शस्य न स्यादिति नस्य

रवस्यपरामर्शादनुमितिस्थले कथितरूपावच्छिन्नस्य तस्यासत्वादतः किंचेत्यादिकमतः स्वद्वारका
व्यवहितोत्तरक्षणोत्पत्तिकस्वसमानाधिकरणानुमितिकसविषयकत्वेन हेतुत्वोक्त्यापूर्वमेव
परामर्शस्यानुमित्युपधायकतानियमस्य प्रकृतत्वात्तदाशंकानिसंदर्भविरोधापत्तेः अत्रानुमि
तिपूर्ववर्त्तिनोक्षणस्यानुमितिदशायामपिसत्वात्तदुत्तरकालमनुमितेर्वारणाय तेनाक्षणापूर्ववर्त्ति
त्वविशिष्टमुक्तं तथाच तदवच्छिन्नस्य प्रागसत्वान्न दोषः क्षणत्वेत्यादिनाविषयत्वभावनात्वादेः
परिग्रहः ननु प्रथमक्षणोत्पत्तीयक्षणसाधारणस्य प्रागुक्ताव्यवहितोत्तरत्वस्य प्रवेशे क्षणान
माद्यादप्यनुमितिः स्यात्तस्यापि परामर्शसंपत्त्यास्वाव्यवहिततृतीयक्षणोत्पत्तिकानुमिति
कत्वादत आह स्वाव्यवहितोत्तरक्षणेति तथाच स्वाधिकरणसमयध्वंसाधिकरणसमयध्वंसान

धिकरणत्वगर्भमेवाव्यवहितोत्तरत्वं निवेश्यमिति भावः नचैतिवाच्यमित्यत्र यः पूर्वोत्पन्नस्यैव
परामर्शस्यास्यापि तदानीमनुमित्यव्यवहितपूर्वत्वविशिष्टस्यासंभवः किं वैशिष्ट्यादिकल्पे दोषासंभवा
दादिमे विशेषुते अन्यथा त्वादिति स्वतदानीमव्यवहितोत्तरानुमितिकत्वाभावात्तत्समानाधिक
37 रणानुमित्यव्यवहितपूर्वतदानीन्तनपत्रत्वाभावाच्चेत्यर्थः तदानीं विरोधिनि सत्यादेर्नाशदशायां
अनुव्यवसायादेरित्यस्य पंचम्यंतस्य संभवादित्यनेन योजना अनुव्यवसायादितो अत्र
मितिसंभवादिति तदर्थः क्वाचित्कावाच्यवस्थान्तरानुपग्रहः ननु यत्र परामर्शविषयिणा
कामिन्याभिलाषया परामर्शमात्रमुत्पन्नं न तु परामर्शोत्तरक्षणे तथात्वे तथा ज्ञान
३७ मात्रस्यैवानुत्पन्नत्वात्पश्चादनुमितिर्न स्यादत आह अन्तःसंस्काराद्विति नच यत्र सर्वोऽशए

वैशिष्ट्यात्मकतत्परामर्शस्तत्र संस्कारस्याप्यसंभवस्तादृशस्थले ज्ञानानां नाशात् अनुमित्यात्मकका
र्येणानुमितस्य संस्कारस्याप्यन्यथानुपपन्नत्वेनोपेक्षणीयत्वस्यैव तत्र सत्त्वात् इत्यप्यस्वरसात् किं वेत्या
दिकल्पस्यात्र तत्त्वादित्यभिप्रायः ननु तादृशस्यानुमितेः संस्कारजन्यज्ञानत्वे स्मृतित्वापत्तिरत आह संस्का
रजन्येति जन्यत्वं सम्बन्धितया न ग्राह्यं नातः संस्कारध्वंसे व्यभिचारः प्रागेव शाब्दः सुतरामन्ये निपातः
निरासादिति प्रत्यभिज्ञायां व्यभिचारादप्रयोजकत्वाच्च संस्कारजन्यत्वे स्मृतित्वानियमादिति भा
वः ननूक्तप्रतिबन्दिभयाद्दूरं भावनिष्ठकारणतायामवच्छेदकविधया कार्यत्वादादिकं मा नि
विशतामभावरूपायाः पद्यतायाः कारणतायां तन्निवेशे तु न किञ्चिदपि बाधकमतस्तथापि प्र
तिबन्दिमाह स्यादिति न यायसतीत्यनुसन्धीयते ज्ञानमात्रस्यैव प्रायशो व्यधिकरणानुमित्यनवहि

तत्पूर्ववर्त्तित्वात्तदन्यत्वस्य च लघ्वादेरभावः । परामर्शविधुरेप्यात्मन्यस्तीति तत्रानुमितिवारणाय स्व
समानाधिकरणानंतरं अनुमितिध्वंसे साध्यविशेषणनिवेशितायां प्राप्तनैव साध्यकानुमितिकरणा
यां सिद्धसाध्यकस्थले विना त्वसाध्यकानुमितेरनुत्पादः तदनुत्पत्तिकालीनोत्पत्तिकध्वंसप्रतियोगित्वल
38 क्षणस्य च क्षणमात्राव्यवहितपूर्वत्वस्यानुमितिपूर्वस्थूलकालेपि सत्त्वात्तद्वृत्ति सिद्धिसत्त्वेप्यनुमि-
त्यापत्तिरतः क्षणेति ननु यत्र सामग्रीवशात्साध्यतद्व्याप्यवत्त्वयोरनुमित्यात्मकः परामर्शस्त
तः साध्यस्यानुमित्यंतरं जायते अनुमितीच्छातो नुमित्यंतरं तत्रानुमित्या कालेप्यनुमित्यापत्तिः पूर्वो
क्तपक्षतानां सर्वेषामेव तदात्मवृत्तीनां तादृशानुमित्यव्यवहितपूर्वक्षणवृत्तित्वेनाविरोधित्वादत
आह असमानेति तथा चोक्तस्थले उत्पन्नानुमितिक्षणस्यैव तादृशाव्यवहितपूर्वत्वानधिकरण

तथा तद्वृत्तित्वविशिष्टस्य परामर्शमात्रस्य सत्त्वेऽप्यनुमितिर्न स्यात् ततः तत्पदं ननु तादृशानुमितेर
व्यवहितपूर्वत्वं तादृशानुमित्युत्पत्तिक्षणेऽनुत्पत्तिकध्वंसप्रतियोगित्वरूपमेवाधेयं वक्ष्यते न तु ता
दृशानुमित्युत्पत्तिकालानुत्पत्तिकध्वंसप्रतियोगित्वरूपं तथा सति सर्वेषामेव क्षणानां तादृशा
नुमित्युत्पत्त्यधिकरणीभूतस्थूलकालानुत्पन्नध्वंसप्रतियोगितया निरुक्तपूर्वत्वानधिकरणत्व
रामस्यैव दुर्लभत्वापत्तेः । एवं च तादृशानुत्पत्तिक्षणेऽनुत्पत्तिकध्वंसप्रतियोगित्वानधिकरणक्षण
वृत्तित्वविशिष्टत्वेन प्रतिबन्धकत्वमपि स्यात् तादृशानुमित्युत्पत्त्यनधिकरणसमयानुत्पत्तिकध्वंस
प्रतियोगिक्षणवृत्तित्वविशिष्टत्वेनैव विरोधित्वमुक्तं क्षणत्वावच्छिन्नपूर्वत्वे लाघवादित्याश
यादाह स्वसमानेति अत्र तादृशसमयाव्यवहितपूर्वत्वं तादृशसमयानुत्पत्तिकध्वंसप्रतियोगित्वमा

39

तेनतुतादृशसमयोत्पत्तिकालीनोत्पत्तिकध्वंसप्रतियोगित्वं आद्योत्पत्तेर्वैयर्थ्यात्रिस्फलत्वाच्च समय
घटत्वव्यवहितपूर्वत्वघटकीभूतोत्पत्तिः कालिकसंबंधेनवृत्तिलाभार्थं अन्यथानुमितिप्राक्क्षणस्यापि
तादृशानुमित्युत्पत्त्यनधिकरणेऽनुव्याप्तौ विवादिनादि संबंधेनवर्त्तमानोत्पत्तिकोयोध्वंसस्तत्
प्रतियोगित्वेनतत्तदुत्पत्त्याधारवृत्तित्वविशिष्टस्यपरामर्शादेःप्रतिबंधकतयास्वकालेप्यनुमित्यापत्ते
रितिध्येयं अथानुमित्यव्यवहितपूर्वत्वं नतूत्पत्तिकालीनोत्पत्तिकध्वंसप्रतियोगित्वं तथाचेतिपूर्व
क्षणस्यापि अनुमित्युत्पत्त्यधिकरणस्थूलकालीनोत्पत्तिकध्वंसप्रतियोगित्वात्तद्वृत्तित्वविशि
ष्टस्यापि विशिष्टादेः प्रतिबंधकत्वापत्तिरतआह तदव्यवहितेति तादृशानुमित्यव्यवहितपूर्व
त्वं चेत्यर्थः। शिवकल्पे निरुक्ताव्यवहितपूर्वत्वस्याप्रविष्टतया सामान्यतोऽव्यवहितपूर्वत्वस्य

३८

३८

निरूपणानौचित्यादिति ध्येयं नचजन्याभावत्वलक्षणस्य ध्वंसत्वस्य प्रवेशे वैयर्थ्यं सभावांतराणामनुत्
पत्तिविरहेणैव निरासादिति वाच्यं ध्वंसत्वानिरूपकप्रतियोगित्वलाभार्थं तदुपादानात् अन्यथा सर्वे
षामेव लक्षणानामनुमित्युत्पत्तिकालोत्पत्तिकस्य चरमे दासकध्वंसांतरप्रतियोगितयातिप्रसंगा
पत्तेः। ध्वंसत्वस्याखंडत्वमते वैयर्थ्यशंकानुदयाच्चेति भावः। नचेति वाच्यमित्यन्वयः। अतएके
पुसाध्यप्रत्ययमद्भति अंसयोरेककल्ययोरेककारणाव्यवहितपूर्वत्वानधिकरणक्षणवृत्तित्वविशि
ष्टेनपरामर्शेनैव प्रतिबंधानुमित्युत्पादेकालेनुमितेः संभवइति भावः। सिद्धेरसत्वेनुमित्या
धूमानुमितिरिवोत्पद्यते परामर्शपूर्वं सिद्धिसत्वेच सैवकारणाव्यवहितपूर्ववर्तिनिमित्ताविरोधि
नीभवतिसतः सिद्धकालिकेस्तुल्ली प्रतिक्षणमवश्यं कस्यचिद्विनाशोपगमात तन्नत्पुरुषीये सुरौ

तदुत्पादसमये अनुमित्सोत्पादसमये स्यादनुमितिः तादृशपूर्ववर्त्तित्वेन स्वसमानाधिकरणानुमि
त्स्याव्यवहितपूर्ववर्त्तित्वेन यद्यप्यनुमित्साया उपेक्षात्वादनुकरणीभूतफलेच्छाया एवानुमितिप्र
त्यतिभिन्नायाः सत्वात्तत्रानुमित्सोत्पत्तिकालेऽनुमितिः संभवस्तथापि सुखानुमितिर्नोपतताभिन्ना
कारिकैवात्र सिद्धाद्यविषयाविभाव्या सा च फलेच्छात्वादेव न फलेच्छान्तरमपेक्ष्यत उक्तदोषः परा-
मर्शोत्तरस्मरणात्मको यादृशः विशिष्टानुभवत्वेतदर्थमपेक्षणीयस्य विशेषणज्ञानादेस्तादृशपू
50 र्ववर्त्तिभिन्नत्वेन विरोधित्वसंभवात् न च स्मरणात्मकपरामर्शे हेतौ संस्कारस्य फलनाश्यस्य
तादृशाव्यवहितपूर्ववर्त्तिभिन्नत्वसंभवः समूहालंबनसंस्कारजन्यपरामर्शस्य चरमफलत्वाभावे
न संस्कारनाशकत्वादितिवदंति। यत्तु सिद्ध्यात्मकपरामर्शोप्यत्रानुमितिरूप एव ज्ञायस्तथाच क

५०

लेख्यादेरपि स्वसमानाधिकरणानुमित्स्याव्यवहितपूर्ववर्त्तित्वादेः प्रतिबंधकत्वासंभवेनैव पुनर
नुमितिरित्यत्र पुनःपदेन क्रियात्मकपरामर्शस्यानुमितित्वं तद्व्यक्तत एव व्यंजितं न च क्रियात्मकानु
मितिसत्वेनुमित्सैव तु ध्वंसानुमित्सांतरत्वप्रकारेण तत्संभवादिति मतं तन्नुच्छं अनवरतेत्याद्युत्तरग्रं
थासंगतेः क्षाणिकपदार्थानुपगमेण संयोगादीनामपि तादृशापूर्ववर्त्तित्वेन प्रतिबंधकत्वायोगादिति
अनवरतमनुवृत्तं परिस्पंदमस्मिन्ये परिमिताः पवनादिपरमाणवस्तैः सार्द्धं यच्चितनसंयोगसंता
नस्तदंतःकृतसंयोगव्यक्तीनामनुवृत्तेनिवर्त्तनाशादित्यर्थः तथा च परामर्शपर्यंतस्थायिन्यः परामर्शो
र्धस्तादात्म्यसंयोगव्यक्तय एव तत्रानुमितिप्रतिबंधिका इति भावः। ननु तत्र कारणाभाव एव प्रयुक्तः फ
लानुत्पादः कारणांतरमेवास्ति यत्र तत्राह। कारणांतरेति नन्वत्रोत्क्रमेण कारणाभावनिश्चये सति

तादृशसंयोगोपरमः कल्पनीयः कारणतानिश्चय एव तु श्राउत्नं संभवस्त्वयव्यभिचारसंदेहेन व्र
तिबंधाराह अचयेति संदेहस्येति प्रकृताभिप्रायेण अविरोधित्वान्नाचयव्यभिचारनिश्चये का
रणांतरमवश्यं कल्पनीयं क्षणिकपदार्थसत्वादनुमितत्वात्पूर्वक्षणवर्तिनि सर्वेषामेवसत्का
41 नाधिकरणत्रयमानुमित्यव्यवहितप्राक्क्षणवृत्तिविनतक्षि नानाकादित्यस्वरसादाह
उपादीयं तामिति प्रतिबंधकतयेति शेषः तथा च त्रयमानुमित्युत्पत्तिक्षणसंबंधा एव तत्रानु
मित्यव्यवहितपूर्वक्षणवृत्तिमित्रत्वेनानुमितिप्रतिबंधका इति भावः। ननु न तादात्म्यसमयसंबंधा
नामात्मस्वरूपत्वे सति तन्नत्वात्तस्य विरोधित्वमसंभवितमेव तन्नत्सममपरूपत्वे तु स्वसमानका
धिकरणप्रमंतरीयानुमित्यव्यवहितपूर्ववर्तित्वेन सिद्धिसमयस्यापि प्रतिबंधकतायोगेऽतिरि

४१

लस्त्वेनयोः संबंधः प्रमाणाभावान्निश्चीयत इत्यत आह भवेन्नेति पूर्वदाहृत्वादिनेत्यादिपदेन तादृ
शपूर्वत्वानधिकरणक्षणाभावत्वादेरुपग्रहः परामर्शादेः कारणत्वरक्षामनुसृत्याह तादृशेति
अत्र तत्पुरुषीयानुमितिं प्रति तत्पुरुषीयानुमित्यव्यवहितपूर्वक्षणवृत्तित्वावच्छिन्नत्वेन हेतुता
यां कालिकसंबन्धेन व्यापकत्वं विशिष्टमतः पुरुषान्तरीयतत्पुरुषीयानुमितिनिष्पादनीयावच्छिन्नत्वा
दिनेत्यादिपदेन तादृशापूर्वत्वानधिकरणक्षणवृत्तित्वविशिष्टाभावत्वादेः परिग्रहः ननु रूपैः
कारणतायाम्विशिष्टापत्तौ को दोष इत्यत आह तथा चेति उपमानादेरित्यादिनाशब्दस्य परिग्रहः सर्वे
वेति उक्तक्रमेणेत्यादिः व्याप्याव्यापकज्ञानसंधाने सत्यापन्नानुपनयोरुपमितिशाब्दयोः कारणतया
नानुमितित्वासंभवादेव तत्कारणत्वोपमानशब्दयोः प्रमाणान्तरत्वं सिध्यते सोऽनुमानरनुमिति

५२

हेतुत्वे चकारेण बाधासंभवात्तयोरप्यनुमानत्वं तन्मते स्यादिति भावः । ननु मात्रापमित्यादिस्थ
लेनानुमिनोमि किं तूपमिनोमीत्यादिरीत्यानुव्यवसायस्तत्रैवोपमित्या व्यवहितपूर्वत्वस्य
स्यानुमित्यव्यवहितपूर्वत्वाभावात् कथं सर्वत्रैव ङ्लानुमितिसामग्री अन्यथोपमित्या
दिकं प्रत्युपमित्यव्यवहितपूर्वत्वत्वादिना हेतुत्वकल्पना सर्वत्रैवोपमितिसामग्रीसत्त्वा
दनुमानस्य प्रमाणान्तरत्वं मन्ममितिस्वं किं न रोचयेदित्यत आह विनीयते चेति परामर्शत्वा
दिनेति व्याप्यपदोभयवैशिष्ट्यावगाहि निश्चयत्वेन व्याप्यवत्पक्षतानिश्चयत्वेन वानुमिते
हेतुत्वं न स्यादित्यर्थः आगुरुस्वविषयकत्वादिनैव परामर्शस्य तथात्वनिर्वाहादिति भावः
बाधात्वादिनेति आदिपदेन ज्ञानितिपदोपग्रहः आगुरुव्यवहितपूर्ववर्त्तित्वेनैव बाधादेः

५२

प्रतिबंधकत्वसंभवादिति भावः । नच बाधादिविशिष्टबुद्धिसामान्यं प्रत्येव बाधत्वादिना हेत्वविरो
त्वस्यावश्यकत्वादिति भावः । कार्य्यतस्य श्रुतशाब्दबोधादिघटिततयात्वं अकामस्यात्वप्रतिबंधक
त्वे च द्रव्यसम्भेतेत्यन्वयः । एवं तथात्वमित्यस्यापि तथात्वशाब्दत्वावच्छिन्नं प्रतिस्वसमानाधिकरण
शाब्दाव्यवहितप्राक्क्षणोत्पन्नसविषयकत्वेन हेतुत्वे विनश्यदवस्थस्य पदार्थोपस्थित्यादेः
शाब्दधीहेतुत्वेनस्यापन्नस्य तत्र शाब्दधीप्राक्क्षणोत्पन्नसंस्कारादेरपि तत्र हेतुतास्यात् । एवं स्व
समानाधिकरणदाहाव्यवहितप्राक्क्षणवृत्तिभिन्नत्वेनैव मण्यादेर्दाहप्रतिबंधक
त्वे कदाचिदुपाहितदाहानंतरं दाहप्रतिबंधकत्वेनस्यात् प्रस्तुतनाकृप्येस्मोदाहोनस्यापिप्रदा
देर्दाहविरोधित्वस्यादित्यर्थः । अतएव कार्य्याव्यवहितपूर्वत्वादेः कारणतानवच्छेदकत्वादिवा

द्वितीय इति तादृशानुमित्यव्यवहितपूर्ववर्त्तिसिद्धिभिन्नसिद्ध्यभावमात्रं पक्षतेति ग्रंथार्थः कस्याद्
५३ त्यर्थः द्वितीयप्रकारे दोषांतरमाह वैयर्थ्यं चेति तादृशानुमित्यव्यवहितपूर्ववर्त्तिभिन्नत्वावच्छिन्ना
भावस्यैवानन्यथकत्वासिद्धिरूपं विफलत्वं तदुक्तरूपस्याप्रसिद्धेः कथंचित्तत्साधनेपि सिद्धिताय
सिद्धेः प्रवेशानौचित्यात्परामर्शादिविरहस्यापि पक्षताविरहादेवानुमित्यनुत्पादसंभवा
दिति भावः यत्तु पक्षतामतं दर्शयति सिषाधयिषेत्यादि केवलपरामर्शसत्त्वेप्यनुमितिर्नेत्यतस्त
स्यैवानुमित्साविरहविशिष्टस्य साधकमानस्य सत्त्वादतोनुमानातिरिक्तपदं अत्रपक्षस्यामा
नमेवानिविशयितुं युक्तं नचानुमितिभिन्नसिद्धिजनकमानमात्रं समानविषये शाब्दादिसामग्री
सद्भावेप्यनुमितेरनुत्पादादत एवैकपदार्थस्यापरपदार्थसंसर्गाभावाप्यधर्मवत्त्वस्य योग्यता

८३

त्वेसंसर्गस्यानुमितिरिवस्यानुशाब्दधीरितियोग्यताग्रंथेमणिकारैरप्युक्तमितिवदंति अन्यतरस्येति उभयं
चसाधकं सिद्धिर्मानं चसिद्ध्यात्मकमितिजनकं चप्रमाणमितिसुगमयमेवमूलस्यसाधकमानमेतादृस्या
र्थ इतिभावः तथासिद्ध्याउपहितं विशिष्टमित्यर्थः।ततस्सामग्रीअर्थमित्यन्यसिद्धेःसामग्रीवत्तु
रादीत्यादिनापददानादिरूपग्रहः वैयर्थ्यादितिसाधकमानस्यपरामर्शादेरनुमितेःपूर्वं तद्वै
शिष्ट्याभावादेरविरोधित्वासंभवादितिभावः।अनुमितिभिन्नसिद्धिप्रागभावविशिष्टत्वमेव
तादृशसिद्ध्युपहितत्वमित्युक्तौ नातिप्रसंगनवावैयर्थ्यमितितुध्येयं अनुमितिसामग्र्यभा
वेनेति अन्यथावह्न्यादेःसन्निकर्षदशायामनुमित्सायामप्यनुमितिर्नस्यादितिभावःअन्य
तरसामग्र्यभाववत्त्वेनेति अन्यथास्मिन्नाविषयेसत्सामग्रीप्रत्यक्षसामग्र्यामनुमित्सुत्पाद

प्रसंगादिति भावः। अन्योन्याश्रयादिति अनुमितिसामग्र्यभाववत्त्वेन प्रत्यक्षहेतुकार्यं हि तत्
५५ मेव प्रत्यक्षसामग्रीमवगम्य तदभावत्वेनानुमितिहेतुत्वं यथा स्यात् अनुमितिसामग्रीज्ञाने चानु
मितिं प्रति प्रत्यक्षसामग्र्यभाववत्त्वेन हेतुताग्रहे विज्ञाते ह्यन्योन्याश्रयानुरूपेण कार्यकार
णभावग्रहासंभवादित्यर्थः। अथानुमितिसामग्र्यभावातिरिक्तं प्रत्यक्षहेतुसामग्रीमेव प्रत्यक्ष
सामग्रीपदेनोपादायासिद्धितदन्यतरत्वावच्छिन्नाभावस्य पक्षताविधयानुमितिहेतुत्वं यथा
स्यमतो नान्योन्याश्रयश्च तत्राह स्यादेतदिति आरोपक्षता इति अनुमितिमात्रसौ यानुत्पत्ति
मियासिद्धिप्रत्यक्षसामग्र्यन्यतराभावस्य कार्यसहवर्तित्वेन हेतुतासंभवादिति भावः। प्रतियो
४४ ग्यारोप्यातिरिक्तस्य प्रत्यक्षकारणस्तोमस्यैव प्रत्यक्षसामग्रीपदेनाभिधानान्न प्रतियोग्यारो

वस्याभावप्रत्यक्षं प्रतिहेतुत्वे गन्धाभावाच्चेदं न युक्तमित्याशयवानसे न कश्चिदित्युक्तोऽन्यथा यं दूषणेनाह व
स्तु तस्येति ननु स्वातंत्र्ये अन्यथासिद्धत्वं तत्र प्रत्यक्षाभावस्यान्वयव्यतिरेकयोर्विवादग्रस्तत्वमत आह निय
मेनेति अन्यतरत्वेन प्रतियोगितानानुपूर्वीप्रत्यक्षप्रतियोगितान इष्येन प्रत्यक्षाभावस्य जयमोपस्थि
तत्वादित्यर्थः। ननु प्रत्यक्षाभावापेक्षया विशेषादिनान्यतरत्वावच्छिन्नाभावस्य ग्रह संभवात्तेदं युक्त
मत आह लाघवादिति प्रत्यक्षाभावत्वेन हेतुतायां अवच्छेदकलाघवादित्यर्थः। प्रत्यक्षे अनुमित्साविर
हविशिष्टसिद्ध्यभावत्वेन तथाविधप्रत्यक्षस्यानुमानाभावत्वेन च तथात्वं अनुमितिहेतुत्वमित्यर्थः न
नु प्रत्यक्षाभावत्वेन हेतुत्वापेक्षया अन्यतराभावत्वेन गुरुत्वात्प्रत्यक्षमेव हेतुत्वं। कल्पनाई मत आह
अन्यथेति अत्र पक्षतायां बाधादेरिष्टापादिना प्रतिपक्षत्वसंग्रहः तथा चानुमित्साविरहविशिष्टसिद्धे

५५ त्तयाविधप्रसक्तस्यासम्भावाबाधप्रतिपक्षादेरन्यतमत्वावच्छिन्नाभावत्वेनैवानुमितिहेतुतास्याद्बाधाद्य
भावस्यैव प्रकारतात्वे गौरवादित्यर्थः नच विशिष्टबुद्धिसामान्ये प्रत्येकं बाधप्रतिपक्षयोर्विरोधित्वा
न्नाप्रसक्ताकुक्षौ तन्निवेशानौचित्यसंसति बाधादिनिर्णये बुभुत्सादशायां विशिष्टप्रत्यक्षावतारे
५६ शानुमित्यादिप्रसंगे न विशिष्टानुमितित्वावच्छिन्नं प्रत्यपि बाधादेर्विरोधित्वस्यावश्यकत्वात् वस्तु
तोऽचांतर्भावप्रसंगादिति ग्रंथस्यान्यतरत्वेन प्रतिबंधकतायामंतर्भावप्रसंगादित्यर्थः तथा च वि
शिष्टबुद्धिसामान्यो विशिष्टानुमितित्वावच्छिन्नं वा बाधप्रतिपक्षान्यतरत्वेनावच्छिन्नाभावत्वेन
हेतुताप्रसंग एव ग्रंथतात्पर्यं अन्यथा तद्विधेयकानुमितित्वावच्छिन्नं प्रत्येव सिद्धिप्रत्यक्षसाम
५७ ग्र्यास्तु तत्प्रकारकानुमितित्वावच्छिन्नं प्रत्येव च बाधप्रतिपक्षयोर्विरोधित्वात्तावदन्यतमत्वाव

त्वेन प्रतिपन्नतायामननुगतानुमितिहेतुत्वासंभवादिति ध्येयं तथा चाभावद्वयस्य हेतुत्वेऽनुमित्सा
विरहस्याहुर्निर्विशेषकैरवं अन्यतराभावस्य हेतुतायां तु सिद्धिप्रत्यक्षसामग्र्यान्यतरत्वेनाननुगते
सकदेव तस्य विशेषणत्वात्लाघवमित्याशंकां निषेधयति नचेति अन्यतराभावस्य हेतुत्वप
क्षेऽप्यनुमित्साविरहो दुर्निर्वचस्य इत्याह शाब्दसिद्धावित्यादिना शाब्दान्यसिद्धिदशायामशाब्दा
नवकारिकेवैव कोदितः शाब्दसिद्धाविनुक्तो विरहस्येति इत्यग्विशेषणताया इत्यर्थेऽन्वयः अ
नुरूपादादिति अनुषंगवशादनुमितेरनुत्पादादित्यर्थः प्रकारांतरेणासंभवात्तु सिद्धिकाय
एव सिद्धिविषयो अनुमितिनिर्वाहकत्वादिति भावः। अनुमितीत्यादीत्यादिपदं प्रत्यक्षाति
रिक्तानन्त्वादिप्रकारकेच्छासंग्रहार्थं सुनिवर्त्तकेति स्वनिवर्त्तकं यत्तु प्रत्यक्षादिसामग्रीसम

वहितापक्षता तदन्यत्वेनेत्यर्थः । तथा च प्रत्यक्षसामग्रीकालीनपक्षः शाब्दान्यत्वानं जायतामिती
ण्यायास्वनिर्वर्तकप्रत्यक्षसामग्रीसमवहितत्वाज्ञोत्तेजकत्वमितिस्वनिवर्तकानुमितिसामग्री
47 समवहितायाअनुमित्यायाउत्तेजकत्वरक्षणार्थं प्रत्यक्षादौ सुकरमादिनाशाब्दोपमित्या
देः संग्रहः । अन्यत्वादिनेत्यादिपदेनसिद्धिप्रत्यक्षसामग्र्यन्यतरदशायां पक्षताव्यक्तिसत्वे
नुमितिस्तावदन्यतमत्वस्यैवानुगमकधर्मत्वस्योपग्रहः । ननु प्रत्यक्षाभावयोः कारणता
ऽयमपि स्यादिति गुरुत्वमलघुत्वान्यतराभाववत्वेनैकस्यैव कारणत्वमुक्तं बाधप्रतिपक्षान्यतर
भाववत्वे न हेतुत्वास्वीकारेपि क्षतिविरहात् तत्राह अन्यतरत्वघटकयोरिति सिद्धिभेदविशि
ष्टं यत्प्रत्यक्षसामग्रीभिन्नं तदन्यत्वं प्रत्यक्षसामग्रीभेदविशिष्टं यत्सिद्धिभिन्नं तदन्यत्वं वा प्रत्यक्षा

४७

न्यतरत्वमित्यत्र विनिगमकाभावस्तथा चानुमितित्वाविरहविशिष्टतादृशप्रत्यक्षावच्छिन्नाभावत्वेन हेतु
तायामवच्छेदकभेदेन कारणताद्वयं न तथाप्यवश्यमतस्तदपेक्षया लघुधर्मद्वयावच्छेदेन प्रत्यक्षाभावद्वयो
रेव हेतुताद्वयं युक्तमिति भावः। ननु प्रतियोगिं विनाकृतैवासिद्धिप्रत्यक्षसामग्र्यान्यतरत्वरूपाखं
डभेदस्यातिरिक्तपदार्थतायां निविष्टा तत्र च विशेषणविशेष्यभावाशङ्कापि नास्ति न च प्रतियोगि
विनाकृताखंडभेदस्यातिरिक्तपदार्थतानिर्वचने प्रतियोग्यविशेषितेन सिद्धिप्रत्यक्षसाम
ग्रीगणान्यतमत्वेन सिद्धिप्रत्यक्षसामग्र्यनुमितिपूर्ववर्त्तिभिन्नत्वज्ञानादिघटितान्यतमत्वे
नावच्छिन्नाभावान्तु अत्राप्यनुमितेर्हेतवः स्युस्तथा च परामर्शत्वादिनाप्यनुमितौ हेतुत्वं न स्यादि
तिवाच्यं सिद्धिसामग्र्यभावस्य पक्षतात्वेऽपि तादृशाभावानां हेतुताप्रसंगस्यान्यथासिद्ध्यैव निरस

नीयत्वादित्यत आह आत्मनिष्ठ इति भिन्नभिन्नत्वेन स्वजनादृष्टवत्वादिकालिकादिस्वरूपेणेत्यर्थः।
58 कालिकादिघटितसामग्र्याः प्रतिबंधकत्वे गौरवादाह तत्तदसाधारणेति चक्षुःसंयोगायालि
कयोः प्रसक्तसामग्र्या इत्यर्थः अभावः कारणमिति प्रकृतेनान्वयः। ननु प्रत्यक्षासाधारणका
रणसमवहितमनोयोगस्येच्छान्यतरयोः समवायसंबंधावच्छिन्नाभाव एव एक एव हेतुर्वाच्य
इत्यत आह मुनिविशिष्टस्येति मनोयोगादेरित्यादिनाज्ञानाद्युपग्रहः अयोगादिति जनक
त्वप्रतिबंधकत्वयोर्विरोधादित्यत आह यद्यप्यात्ममनोयोगत्वेनानुमितिजनकस्यापि
निरुक्तान्यतरत्वेन तत्प्रतिबंधकत्वेपि न व्यतिरेकरूपेणैव तयोर्विरोधात्तु मणित्वापे
५८ क्षयानुरूपत्वेनैव च मणिविशिष्टवह्नित्वेन दाहप्रतिबंधकत्वाकल्पनात्तथापि विशिष्टाभा

वस्यविशेषणायभावेनातिरिक्तत्वादखंडतत्तद्व्यक्तित्वेनहेतुत्वासंभवादुक्तान्यतरत्वावच्छिन्नाभा
वत्वेनचहेतुत्वेऽन्यतरत्वांशेविशेषणविशेष्यभाववैपरीत्येनगुरुतरकार्यकारणभावत्वयाप
त्तेःसिद्धिसत्वदशासामग्र्याःप्रत्येकाभाववत्त्वेनैवहेतुत्वमित्येवमूलयुक्तिमितिध्येयंतथाचेतिप्रति
बंधकतावच्छेदकसंबंधाननुगमेचेत्यर्थः।तयोःसिद्धिसत्वदशासामग्र्योःप्रतियोगितावच्छेदक
संबंधभेदादिवतदवच्छेदकधर्मभे-दादप्यननुगतरूपेणहेतुत्वासंभवंदर्शयितुमाहएक
मितिएकप्रहराद्यवच्छिन्नेकालम् निसिषाधयिषाविरहविशिष्टायाःसिद्धेःसत्वेप्यनुमित्या
दशायांप्रहरांतरेसंपत्त्यर्थमेकदाएवेतियद्यपिपूर्वक्षणावच्छेदेनेऽनुमित्याविरहविशिष्टायाः
सिद्धेरनुमित्यादशायामपिसत्वात्तदानींप्रहरान्तरस्थानुमित्याविरहेणोपनीतायाःसि

59 बाधयितादशायां सत्वेपि न तद्विरहवैशिष्ट्यावच्छिन्नसिद्धेः सत्वे तदानीं विशेषणाभावादिति वाच्यं
तथा च सामयिकत्वावच्छेदेने तस्य वैयर्थ्यापत्तेः तथापि सामयिकास्यं तन्माभावानां तत्तत्समयाव
च्छिन्नमेवाधिकरणं स्वरूपाख्य :संबन्धेन त्वधिकरणमात्रं प्रतियोगिसत्वदशायामपि त
दधिकरणे तदभावापत्तेस्तादीयसं बधप्रयुक्तत्वात द्रव्यस्यैताशयेनैकक्षणावच्छेदेने सुखे
अत एव स्वरूपवत्तानियामकसंबन्धो न शुद्धः समवायः कालादिरपि रूपवत्त्वापत्तेः किंतु तत्तत्कालि
निरूपितत्वविशिष्टः समवाय एवेति सिद्धान्तः यदि चाभावस्य रूपमेव स्वरूपसंबधः स च प्रति
योगिसत्वदशायामधिकरणे न वर्त्तते प्रतियोगएव विरोधित्वात् वृत्तिमत इव वृत्तेरप्यव्याप्य
५८ वृत्तित्वात् । सामयिकत्वं चाभावस्य समयघटितस्वरूपसंबधेन वृत्तिमत्वं परं तु समयविशेषाव

च्छेदेन स्वरूपसंबंधेन वृत्तिमत्त्वं गोत्वाद्यभावानामनुवृत्तिनैः समयावच्छिन्नाभावानां भावानामभावयोरेक
धर्मिणि सत्तायामेव विरोधभंजनार्थमवच्छेदकस्वीकारात् इदानीं गोत्वं नास्तीत्यादिप्रतीतौ चा
धिकरणत्वेनैव समयस्य भानादिति विभाव्यते तदेकालवृत्तित्वलक्षणस्य वैशिष्ट्यस्य सामयिक
त्वप्रदर्शनार्थमेवैकक्षणावच्छेदेनेत्युक्तं ननु वैशिष्ट्यपि तदंतर्भावे तस्य स्मृत्युरुचरणाः अन्यादृशं
स्यात्रयनिष्ठाहेतुनत्यत्वादिरूपं नचानुमित्याविरहविशिष्टसिद्धेरनुमित्याविरहविशिष्टप्र
त्यक्षसामग्र्याश्चान्यतरत्वावच्छिन्नाभावत्वेन हेतुत्वाद्द्विविधस्य वैशिष्ट्यस्य प्रवेशोपि नाननुग
मइति वाच्यं प्राक्तनलक्षणावच्छेदेन सिषाधयिषाविरहविशिष्टायाः सिद्धेः प्रत्यक्षसामग्रीवातस्याः
सिषाधयिषाविरहविशिष्टत्वादशायामपि निरुक्तान्यतरत्वेन प्रतिबंधकत्वात् तन्नुतरदोषः

50 ऽनुमितिसत्त्वापत्तेः न च सिसाधयिषाविशिष्टत्वाद्दृशां सिद्धेः सिसाधयिषाविरहविशिष्टान्यत्वमेव भेद
स्याव्याप्यवृत्तित्वात् तथा च तदन्योन्यनिरुक्तान्यतरत्वावच्छिन्नस्यैवेति वाच्यं तथाप्युक्तान्यतराभाव
त्वेन हेतुत्वे गुरुतरकार्यकारणभावद्वयापत्तितादवस्थ्यात् विशिष्टाभावस्याखंडस्य प्रमाणाभा
वेन निरस्तत्वादिति भावः। ननु यत्र यत्रानुमितिस्साविरहविशिष्टप्रत्यक्षसामग्र्यभावोपि दृष्टगतु
—मितिहेतुस्तदा मूलस्य साधकमानपदेनापि सामग्रीविशेषएवाधीयतां यथाश्रुतानुरोधात्त
नु साध्यवत्तानिश्चयपद इत्यत आह सामग्रीविशेषवेति लाघवादिति अनुमानातिरिक्तसिद्धिसामग्री
मपेक्ष्य सिद्धेः प्रवेशे लाघवादिमर्थः। तथा च पक्षतापदप्रवृत्तिनिमित्तनिर्वचनानुरोधादेव साध
५० कमानपदेन साध्यनिश्चयो व्याख्यात इति भावः प्रवृत्तिनिवृत्तिनिर्वचने मूलस्वरसमाह एतदे

वेति अन्यथाकारणमित्यनुक्तमित्येव व्याप्त्यावगाहिपक्षपक्षीयतायामुक्तशंकाव्युदाससंभवादिति भावः।
नन्वेवमनुमितेः काप्रवेशे नातिलाघवमबाधनिश्चयाभाव एव पक्षतापदप्रवृत्तिनिमित्तमस्त्वित्यत आह फ
लानुपहितेति स्वविषयासिद्ध्यनुपहितत्वं तदनुमित्साविरहविशिष्टत्वमर्थः। ननिविशाड्त्वस्य पक्षता
पदशक्यतायामित्यादिः ननु सिद्ध्यभावस्य पक्षतात्वेपि सिद्धिदशायां पर्वतादौ पक्षताव्यवहारो दुर्वा
रः। समयावच्छिन्नसिद्ध्यभावस्य विशेषणतया पर्वते सत्त्वात्। न च तदीयसिद्धिविरोधित्वाभाव एव
तेवति पक्षताव्यवहारनिमित्तं तस्यानिमित्तहेतुत्वात् अनुमितिहेतोरेव पक्षतायाः प्रवृत्तिनिमित्तत्वा
त् पक्षतानुमितिहेतुरित्यादिव्यवहारादत आह विशिष्टेति अनुमित्साविरहविशिष्टेत्यर्थः परंपरा
संबन्धादिति तथा च यदा यत्र पुंसि निरुक्तसिद्ध्यभावस्तत्कालावच्छेदेन तत्पुरुषीयस्वप्रतियोगि

विरोधित्वाभावरूपपरं परासंबंधेन निरुक्तस्मिस्माभाववत्त्वं तत्कालावच्छेदेन तत्पुरुषे प्रतिपत्तव्यं वहा
रनिमित्ते प्रतिभावः । ननु सिषाधयिषाविरहविशिष्टप्रत्यक्षादिसामग्र्यभावस्य पक्षतापदिहेतुत्वे तुर्यदि
पुरुषांतरावच्छेदे नानुमित्साविरहविशिष्टापत्तेः प्रत्यक्षसामग्र्याः सत्त्वदशायां स्वानुमित्सासत्त्वेप्यनु
51 मित्स्यनापत्तेः न चानुमित्साकालीनान्यतमेवसामग्री विशेषणं तथा सति पुरुषांतरे नुमित्सादशायां
तद्भिन्नपुरुषस्याप्रिसंसः सामग्रीसत्त्वेनुमित्स्यनापत्तेरतः पुरुषविशेषांतर्भावेन सामग्र्यभावस्य हेतुत्वं
निर्वक्ति एकस्येत्यादिना तद्भिन्नरहितयोऽनुमित्साविरहितः तत्पुरुषीयेत्यादि अत्र तत्पुरुषीयेत्या
दि अत्र तत्पुरुषीयत्वं तत्पुरुषावच्छिन्नत्वं तदप्यनुमित्साविरहस्यैव विशेषणं तेन तत्पुरुषावच्छे
देनानुमित्साविरहकालीनोपस्तत्पुरुषप्रसिद्धिस्तद्विरहपर्यवस्यति यथाश्रुते तत्पुरुषीयत्वस्या

नुमित्साविशेषणत्वे तत्पुरुषीयानुमित्सादशायामपि घटादिपक्षे दर्शनतदभावसत्त्वात्तदानीं तन्नरस्य
दशामग्र्यामपि तदीयानुमितिप्रतिबन्धकत्वापत्तेः यद्वाग्यामिवाग्रेप्यनुमित्साव्यतिरेके योविशेष
निवेश्यते न वस्तुतस्तरपरामर्षदशायामनुमितित्वादिप्रकारकेच्छासत्वेपि सविकल्पकस्य वह्नेरनुमि
तिर्नैवावह्नेरनुमित्साप्रसक्तेश्चयोसन्तदशायामनुभयसामग्रीसमवधानेनुमितिस्तत्र साऽनुमित्सा
व्यतिरेकेत्येककोटौ वव्रवेश्यत्प्रत्यक्षादावनुमित्साविरहविशिष्टायामेवानुमित्सायाऽन्तेनकत्वा
त्रैम दोषइत्यपिवदन्ति सिद्धिसामग्रीमात्रस्याप्रतिबन्धकत्वाड्ढौ विरोधीतितेनप्रत्यक्षात्मकसि
द्धिसामग्रीलाभः यद्यपि सिद्ध्यात्मकप्रत्यक्षादावपि सामग्रीमात्रं न प्रतिबन्धकं प्रसिद्धसाध्यकस्य
लेसर्वत्रैवसाध्यवत्तोपनीतभानसामग्रीसंभवात् । नापिलौकिकप्रत्यक्षसामग्री तथा वंशेसमवेत

52

व्याप्यवत्तानिश्चयदशायां मेरुकवर्शांजनादिविसर्पिलालौकिकप्रत्यक्षसाघ्युत्पत्तिप्रसंगात् । तथावि
साद्यानुकारत्वनिरूपितसाध्यप्रकारताकप्रत्यक्षस्येव सामग्री प्रवेश्यात्तादृशीवप्रकारतालौकि
कत्वदोषविशेषजन्यविस्लाध्यस्य प्रत्यक्षत्ववत्तत्एवोभयत्रैव सर्पि त्ता द्यानुकरोमीत्यानुम
वादित्यन्यत्र विस्तृतं नचैवं साध्यस्य निर्विकल्पकसामग्र्याः प्रतिबंधकं न स्यादिष्टत्वात्तस्याः
इयकप्रतिबंधकत्वोपगमेपि व्याप्तेर्भानानु अनन्यगतिकतयेति नचैतदुपपत्तकतत्साध्य
कानुमितिं प्रत्यनुमित्साविरहविशिष्टिततद्धर्मिकसाध्यानुकारत्वनिरूपिततत्प्रकारता
कत्वेनैवाविरोधित्वं तथा च तदभावस्य कार्यसहभावे नहेतुत्वादेव न तत्प्रत्यक्षस्योत्प
त्तिकाले नुमितेरित्यन्यथागतिरस्त्येवेति वाच्यं यत्र पर्वतत्वस्य मानाधिकरण्येन वह्निमत्ताप्र

५२

स्थितोत्पादस्तत्रोत्तरकाले पर्वतत्वावच्छेदेनापि वह्न्यनुमितेरनुत्पादप्रसंगात् न च पर्वतत्वावच्छि-
देन वह्न्यादिसाध्यवत्तासत्त्वाऽनुकारत्वेनैव विरोधित्वं वाच्यं तथा सति पर्वतत्वादिसामानाधि-
करण्येन साध्यवत्ताज्ञानस्य सामग्रीसत्त्वेप्यनुमित्यापत्तेः । वस्तुतो पक्षानुमित्यानंतरं साध्य-
तद्व्याप्यवत्त्वयोः पक्षधर्मिकनिश्चयादनुमितिस्तत्र कार्योत्पत्तिकाले नुमित्साविरहविशि-
ष्टसाध्यवत्ताज्ञानस्यासत्त्वात् कार्यसहभावेन तदभावस्य हेतुत्वं दुर्घटमेवेति ध्येयं
अननुगमादिति मणिमेव महो पक्षीभूते न कत्वस्यैकत्वस्याभावादिति भावः । इहापि अनुमि-
तिस्थलेपि दर्शितरीति अनुमित्सा प्रत्यक्षादि मिन्नेव वाह्निता ने न ज्ञायता मित्सादि नानाविधेच्छाया
उक्तेनैकत्वस्य प्रागदर्शितत्वादिति भावः । ननु पक्षे पक्षे साध्यकानुमितिस्थलेपि दृश्यमाने क

सिषैकानुमितित्वात तत्तस्यात्मत्वरूपेण हेतुतायामननुगम एव सिद्धिदशायां यत्र यत्रानुमित्सासत्वेनु
मितिस्तत्तदनुमित्साविरहकालावच्छिन्नाभावत्वेनैवानुगतरूपेणवास्तिअस्तु तत्रानुमितिसामा
न्ये हेतुत्वं वाच्यमत आह सिसृत्तरेति सिद्धिसामान्याव्यवहितोत्तरत्वमननुगतं सिसृत्तरत्व
53 मात्रं चातिप्रसक्तमिति भावः। सिद्धिस्थितिकालीनानुमितिसिद्धिस्थितिक्षणोत्पत्तिकानुमित्य
पि। तेनानुमितिमात्रस्यैव स्वात्मकसिद्धेस्थितिक्षणवृत्तित्वेपि नातिप्रसंगः अत्र सिद्धिस्थि
तिक्षणत्वं न सिद्धिस्थितिक्षणसुत्तरत्वं सति सिद्धिविशिष्टक्षणत्वं अनुमितिमात्रस्यैव ता
दृशक्षणोत्पत्तिकत्वेनाव्यावर्तकत्वापत्तेः। किंतु सिद्धिसमयध्वंसोत्पत्तिकत्वं सतिसि
द्धिविशिष्टक्षणत्वं तथा चोत्पत्तिरूपस्य वैशिष्ट्यनिवेशे गौरवमत आह स्वेतरेति स्वेतरसिद्धिक्षणोत्प

५३

पत्तिकमित्यर्थस्तेन स्वद्वितीयक्षणोत्पन्नसिद्धिकालीनानुमितौ न व्यभिचारः पघ्पितयोः स्वत्व
गर्भत्वे नानुगतत्वाभावात् प्रागुक्तेनानुगतत्वेनातिप्रसंगानिर्वचनदोषे सैव गतार्थत्वं तथापि स्वे
तरत्वविशिष्टस्याधिकरणक्षणोत्पत्तिकत्वादिसंबंधेन सिद्धिविशिष्टानुमितित्वे तात्पर्यमि
ति वदंति विनापीति सिद्धिनाशकालोत्पत्तिकानुमितीनां सिद्धिस्थितिकालोत्पत्तिकत्वा
भावेनानुमित्यायास्तत्राप्रयोजकत्वादिति भावः । ननु तदानीमपि कस्यचित् सिद्धिसत्वे
न सिद्धिनाशकालीनानुमितिरपि स्वेतरसिद्धिक्षणोत्पत्तिकत्वमिवेत्यनुमित्यां विना तस्याः
कथमनुत्पादः स्यादत आह ॥ कस्येति अनुत्पादेति तदनुमितेरप्यन्यदीयसिद्ध्युत्तरोत्पत्ति
कत्वेनानुमित्याप्रयोजकत्वादिति भावः तत्पुरुषीयेति तत्पुरुषीयसिद्ध्युत्तरतत्पुरुषीया

नुमितिं प्रति न तत्पुरुषीयानुमित्याद्याहेतुत्वेन तत्पुरुषभेदानंतहेतुत्वापत्तिरित्यर्थः। ननु स्वसमा
नाधिकरणविशिष्टस्वाव्यवहितोत्तरोत्पत्तिकत्वसंबंधेन सिद्धिविशिष्टानुमितित्वमेव
54 सिद्धिसिषाधयिषायाः कार्यतावच्छेदकं वाच्यं तत्र व्याप्यव्यवहितोत्तरत्वं द्वितीयक्षणस्य साधारणं प्रागुक्त
सार्वभौमादिशाउष्ट्यमतो न सिद्धिनाशकालीनोत्पत्तिकानुमित्यसंग्रहेण व्याप्तमंतीयसिद्धिमा
दायापत्तिप्रसंग इत्यत आह अपि चेति सामान्यसामग्रीत इति सिद्धमावत्स्थलीयानुमितौ कृ
प्तहेतुताकानुपरामर्शव्याप्त्यात्मककारणस्तोमादित्यर्थः। ननु विशेषसामग्रीसहितायाएव
सामान्यसामग्र्याः कार्यजनकत्वान्नु प्रकृते चानुमित्यात्मकविशेषसामग्र्याः विरहात्कुतो
नुमित्यापत्तिरत आह न हीति ईदृशीति अनुमित्यात्मकेत्यर्थः नास्तीति विनानुमित्सां परम

48

वैमात्यारप्यनुमित्युत्पादात् । तथाचोक्तनियमाभावात् सिषाधयिषाभावस्थल इव सिद्धिस्थलेऽपि विशेषसा
मग्रीविरहेऽपि सामान्यसामग्रीसत्त्वादनुमितिः स्यादिति भावः । अन्यत्र सिषुतरानुमितौ ननु सिषु
तरानुमितावनुमित्साया इव तदनुत्तरानुमितावपि सिद्धिसामान्याभावस्य हेतुत्वं वाच्यं तथा च
परामर्शादिसामान्यसामग्रीसत्त्वेऽपि सिद्धिदशायां निरुक्तविशेषसामग्रीविरहादेव नानु
मितिरत आह तदिति सिषुतरानुमितौ सिषाभावरूपसामग्र्यन्तरकल्पने चेत्यर्थः । अतिगौरवमि
ति विशेषतः सामग्रीद्वयकल्पनमपि स्यादनुमितिसामान्ये एकैकस्य विशिष्टसिषाभावस्य हेतुत्वे
लाघवादित्यर्थः । न च सिषुतरतत्तदनुमितिव्यक्तित्वमवच्छेदं तत्तत्परामर्शादिव्यक्तेर्विशिष्टस्य हेतु
त्वमुपेयमन्यथा परामर्शादेः सामान्यकारणस्य विशिष्टत्वानतैवानुमितेरनुत्पत्तिदशायांभाव्य

नुमित्सेतरापत्तेस्त्वया च तत्तत्परामर्शात्मकविशेषसामग्रीविरहादेव सिद्धिदशायामनुमित्यापत्त्यसं
भव इति वाच्यं यत्र क्रमेण सिद्धिपरामर्शौ सिद्धिनाशानुमितयस्तत्रत्यानुमितिव्यक्तेः सिद्धिनाशोत्पत्ति
दशायामापादनीयत्वात्तद्व्यक्तिहेतोः परामर्शस्य प्रागपि सत्त्वात् न च तथाविधानुमितिव्यक्ति
प्रति तत्तत्सिद्धिनाशत्वेन स्वतन्त्रतत्क्षणोत्पन्नत्वादेर्विशिष्य हेतुत्वकल्पनात्तदभावादेव न
55 तादृगनुमितिरिति वाच्यं क्षणादीनां विशिष्य हेतुतायामनन्यथासिद्धत्वादन्यथा सर्वत्रैव तत
तत्संबन्धानां विशिष्य हेतुतापत्तेः सामान्यस्य विशेषणतः कारणेतरस्य क्वापि कल्पना न स्यात्
अनन्ततत्तत्क्षणव्यक्तीनां तत्तदुत्पन्नत्वादीनां वा विशेषणतो हेतुत्वकल्पनामपेक्ष्य विशि
ष्टसिद्ध्यभावस्यैकस्यैवानुमितिसामान्ये हेतुत्वकल्पनायामेव लाघवान्नैव चिन्त्याचेति भावः ॥ शंक

नेहेति सिद्धिस्थल इत्यर्थः । सोऽनुमितिः करणं यस्यानुमित्यात्मकेत्यादिः साक्षित्वतरत्वावच्छिन्ना
नुमितिः प्रागल्भमतेन निरस्यति करणेत्यादिना न त्वपक्षता विशिष्टपरामर्शत्वेनैव परामर्शविशिष्टप
क्षताविनापि विनिगमकाभावेन हेतुत्वापत्त्या उपरि वत्वाघवात्तस्मान्नैवेन हेतुत्वमत उक्तं कर
णेति तथा चानुमितिकरणस्य व्याप्तिधियः सव्यापारकत्वनियमात्तत्पर विधयैव परामर्शस्य
हेतुत्वमावश्यकं पक्षतायास्तु व्यापारत्वासंभवात्तदनुरोधेनापि न हेतुत्वमित्येव स्फुटं विनि
गमकमिति भावः । न च स्वमते मनस एवानुमितिकरणत्वान्न तनुसंयोग एव जन्यज्ञानमात्रे
व्यापार इत्यनुमितौ पक्षताविशिष्टपरामर्शस्येव परामर्शविशिष्टनिरूक्तसिद्ध्यभावस्येव पक्ष
तायामपि हेतुतायां विनिगमकाभाव एवेति वाच्यं परामर्शविशिष्टपक्षताया हेतुत्वस्य दुर्वचत्वा

न्तत्र हि परामर्शेन सिद्धेर्विशेषणं तथा सति परामर्शविशिष्टाया निरूढे सिद्धेरभावत्वेन हेतुत्वे
परामर्शशून्यस्यापि पुंसो ऽनुमित्यापत्तेस्तस्यापि परामर्शविशिष्टसिद्धेरभावत्वात् न च परा
मर्शविशिष्टो यो निरूढसिद्ध्यभावस्तत्वेन हेतुत्वं मिथो विशिष्यानापत्तेयोः सिद्धिपरामर्शयो
56 रभावांशे विशेषणीभूयावच्छेदकत्वासंभवात् व्यासज्यवृत्त्यवच्छेदकत्वानंगीकारादन्यथा
निरूढसिद्ध्यभावत्वपरामर्शयोर्द्वयोरेव व्यासज्यवृत्त्यवच्छेदकत्वेन सामंजस्ये तयो विशेष
णविशेष्यभावे विनिगमनाविरहो ऽभवे नास्योन्मत्तप्रलपितत्वापत्तेः पक्षता विशिष्टपरा
मर्शस्य विशिष्टवैशिष्ट्यापन्नस्यैतावच्छेदकतया तद्रूपेन हेतुतायां बाधकाभावादिति चे
यं प्रतिबंधकांतरं बाधनिश्चयादि। ननु कारणतावच्छेदकविशिष्टसत्वस्यैव कार्योत्पत्ति

५६

नियामकत्वात्तत्रैवान्वयव्यतिरेकावुपेक्षीण्यावत आह अन्यथेति अन्वयादिसत्वेप्यहेतुत्वे इत्यर्थः।
घटादिकार्यस्य समवायिकारणत्वाप्रसिद्ध्यातन्निमित्तकारणस्य तदवच्छेदकत्वासंभवादाह यथा
संभवमिति समवायिकारणत्वादीत्यादिना समवायिकारणत्वस्योपग्रहः। तथा च घटादिका
र्यस्य प्रतिनियतदेशत्वरक्षायै तंतुसंयोगघटादेः घटादिहेतुत्वमावश्यकमिति तत्रैव दंडत्वस्या
दिकमवच्छेदकं स्यादित्यर्थः। कार्यकालवृत्तेरिति अन्यथापूर्वभावमन्यभावसत्वात्सुत्पत्तिका
लेपि दाहापत्तेरिति भावः। प्राचांमतेनेदं स्वमते तु मण्युत्पत्तिदशायां मणिसामग्र्या एव प्रतिबं
धकत्वान्न दाहः। अन्यथा संयोगेन मण्यभावस्य तदानीमपि सत्वात्तस्य कार्यसहभावेन हेतु
त्वे समाप्यतीकारापत्तेरिति ध्येयं। न च कार्यसहवर्त्तित्वस्य कारणतावच्छेदकत्वे तद्वैशिष्ट्यस्यै

न्प्रतिबंधकाभावस्य पूर्वसत्त्वमपेक्षितं। तदा सत्यपि मण्याद्यभावे दाहादिकार्यं न स्यात् पूर्वकाले
दाहाद्युपहितस्य तस्याभावात् कार्यसहवर्त्तित्वोपलक्षितस्य च तस्य पूर्वसत्त्वापेक्षणे मण्याद्यु
51 त्पत्तिदशायामपि दाहादिकार्यप्रसंगः कदाचिद्दाहादिवर्त्तिन एव मण्याद्यभावस्य मण्याद्युत्प
त्तेः प्राक्सत्त्वादिति वाच्यं कार्यसहवर्त्तित्वस्य कारणतावच्छेदकत्वात् मण्याद्यभावेनैव हेतु
त्वात् प्रतिबंधकाद्यभाववत्त्वविशेषिते तस्याव्यवहितोत्तरक्षणत्वादिसंबंधेनैव च सामग्र्याः
कार्योत्पत्तिव्याप्यत्वात् प्रतिबंधकोत्पत्तिकाले कार्यप्रसंगः समवाय्यादिकारणस्यापास्य
मेव कार्यसहभावेन हेतुत्वं विवक्षणीयमिति दिक्। तत्तद्देशीयतत्तद्दाहादिकं प्रति तत्तद्दाहाद्यु
त्पत्तिकालावच्छेदेन तत्तद्देशवृत्तिमण्याद्यभावत्वेन हेतुत्वं कारणतावच्छेदकस्य पूर्वसत्त्वानपे

लक्षणाच्च प्राक्तनत्वेन दाहोत्पत्तेरसत्त्वेऽपि न हानिः नचैवं दिशा समवायादिकारणस्यापि तादृशहेतुत्वं
निरूपणीयमित्यपि वदंति तदसंभवादिति निरुक्तसिद्ध्यभावस्यासंभवादित्यर्थः। सा अनुमितिः
तद्यत्त्वेन कार्यकालवृत्तित्वेन सर्वस्येति तद्यत्त्वेन हेतुत्वमित्यन्वयः। ननु प्रतिबंधकाभावत्वस्य
तादृशेन हेतुताव्याप्यत्वात् प्रामाणिकमतमाह अन्वयेति सहभूतस्यैवेति अन्यथा घटादेर्नाशोत्
पत्तिदशायामप्यन्यदीयकर्मादिना तत्र संयोगाद्युत्पत्तौ तात्त्विककार्यस्वीकारापत्तेरिति भावः।
तद्यत्त्वप्रकारकौ कार्यसहभावेन हेतुत्वप्रकारकौ विनयेवाचिति प्राभाकरैः कारणमात्रस्यैव कार्यस
हभावेन हेतुत्वस्वीकारादन्यथा कार्यकालासत्तोऽपि प्रतियोगिनः पूर्ववर्तितामात्रेणैव हेतुतासं
भवात्तेषामव्यतिरिक्तध्वंसकल्पनापत्तेरिति भावः। एकपरामर्शादनुमितिद्वयोत्पादेऽपि प्रवा

हासंभवादाह क्वचिदितितथाचयत्रपूर्वपूर्वानुमितिदशायांपरामर्शान्तरस्यसामग्रीसत्त्वंतत्रैव
परामर्शानुमित्योःप्रवाहस्संभवइतिभावः।आनुभविकत्वादितिपक्षतानानुमितिहेतुरित्यग्रेऽन्वि
58 तं।ननूक्तस्थले कथमेकेनानुमितिप्रवाहः किंत्वेकैवानुमितिनाशोत्तरमपरानुमित्युत्पत्त्यैवसइ
त्यतआह।कालभेदेति ननुयत्रविषये क्रमेणानुमितिप्रवाहोनानुभवसिद्धस्तत्र साध्यकानुमि
तावेवपक्षताहेतुरस्त्वित्यतआह मानाभावाच्चेति ननुसिद्धेर्नानुमित्यविरोधित्वे परार्थस्य
लेतदुद्भावनेनस्यात् प्रमाणदोषत्वादाह परार्थेति अर्थान्तरेति तथाचनिग्रहेतेवक्तानिजिस्था
साविरहादनाकांक्षिताभिधानत्वेनपुरुषदोषत्वैवतदुद्भावनं ननुप्रमाणदोषत्वमेवेतिभावः।
अत्रेदमालोचनीयं।समानविषयप्रत्यक्षसामग्रीदशायामनुमित्यनुत्पादात्पक्षत्वस्यादिप्रत्यक्षगमन